RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
वरमेको गुणी पुत्रो न च
मूर्ख शतान्यपि।
एकश्चन्द्रस्तमोहन्ति न च
तारागणैरपि॥

संसारकटु वृक्षस्य द्वे फले
अमृतोपमे।
सुभाषितं च सुस्वादु
सगतिः सुजने जने॥
(आचार्य चाणक्य)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
पत्रं नैव यदा करीर विटपे
दोषो वसन्तस्य किम्
नोलूकोप्यवलोकते यदि दिवा
सूर्यस्य किं दूषणम्।
वर्षा नैव पतन्ति चातक मुखे
मेघस्य किं दूषणम् यत्पूर्व
विधिना ललाटलिखितं
तन्मार्जितुं कः क्षमः॥
(भर्तृहरि)

卐 वर्षम्-१३ 卐 अंकः-०१ (२८९) नवदेहली 卐 १ जुलाईमासः २०२३तः १५ जुलाईमासः २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## नवमे अंताराष्ट्रिययोगदिवसे स्वामी रामदेवः २० सहस्रयोगसाधकेभ्यः 'योगःसर्वेभ्य' इति संदेशं दत्तवान्

**वयं प्रदेशं योगः, अध्यात्मं, संस्कृतिः इत्येषां क्षेत्रे विकसितं करिष्यामहे : मुख्यमंत्री**

हरिद्वारम्, 21 जून। तत्र पतंजलि वेलनेस केन्द्रे, पतंजलि योगपीठे-।। स्थिते विशालक्षेत्रे योग सत्रस्य आयोजनं कृतम् । यत्र प्रायः 20 सहस्रं योगाभ्यासम् अकुर्वन् । स्वामिना उक्तं यत् पतंजलि




विश्वविद्यालयस्य विद्यार्थी ऑक्सफोर्ड, हार्वर्ड, स्टेनफोर्ड इत्येते विश्वविद्यालयाः, आई.आई.टी. तथाच आई.आई.एम. तः अपि अधिकं स्वास्थ्य धन सृजनं कर्तुं शक्ष्यामः। अवसरममुं पतंजलिः उपलब्धं करिष्यति । पतंजलि विश्वविद्यालयतः विद्यार्थिनः विज्ञानं, गणितं, तकनीकी, आर्टिफिशियल इंटेलिजेंस, ऐरो-स्पेस, सूचना तकनीकी इत्यादिभिः सहैव भारतीय संस्कृतेः पुरातन ज्ञानस्य बले अनुसंदधाति । एकत्र यूएनओ इत्यत्र देशस्य प्रधानमंत्री योगं कुरुते अपरत्र उत्तराखण्डे विंशतिसहस्रात् अधिकजनैः सह प्रदेशस्य सर्वाधिकयुवमुख्यमंत्री योगाभ्यासं कुरुते।

कार्यक्रमे आचार्य बालकृष्णः कथितवान् सर्वप्रथमं स्वामिना एव र योगस्य शंखनादः विहितः। विश्वपटले योगः शोभते। योग फॉर ऑल इत्यस्य मूर्त रूपं पतंजलौ दृश्यते । अद्य दिव्यांगजनाः, जाति-धर्म.सम्प्रदाय-क्षेत्र-प्रांत-भाषाः इत्येषां नामभिः वैभिन्यं जातम् । तन्निवारयितुं पतंजजलिः कार्यं कुरुते। उत्थिताः । उत्तराखण्डस्य माननीय मुख्यमंत्री श्री पुष्कर सिंह धामी कथितवान् यत् मम परम सौभाग्यं यत् स्वामिनः सान्निध्ये योगाभ्यासं कर्तुं अवसरं प्राप्नोत् । उत्तराखण्डः

शेषभागःअष्टमपुटे

## आचार्याय राधावल्लभ-त्रिपाठिने तदीयाय उपन्यास 'मानवी' इत्यस्मै राष्ट्रियसंस्कृतबालसाहित्यपुरस्कारः दत्तः




नई दिल्ली साहित्य अकादमी, संस्कृति मन्त्रालयः,भारत सरकारः संस्कृत कवये ,नाट्यकाराय उपन्यासकार आचार्य राधावल्लभ त्रिपाठिने तदीय चर्चित संस्कृत बाल उपन्यासाय श्मानवी श्इत्यस्मै 2023 तमस्य वर्षस्य संस्कृत बाल साहित्य पुरस्कारः दत्तवान् । उल्लेखनीयं यत् अत्र नवोन्मेषीबिम्बैः बाल मानसाय पक्षिभिः पर्यावरण महत्त्वं मनभावनविधिना वर्णितम् । यद्यपि इयं रचना पक्षिविशेषज्ञाय पद्मश्री सलीम अलीमहोदयाय समर्पिता तथापि अस्मिन् उपन्यासे यत् सलीम नाम्नः चरित्रं तत् पद्मश्री अलीतः नैव सम्बद्धम् । ध्यातव्यं यत् है समीक्षकेण उपन्यासलेखकेन प्रो. त्रिपाठिना अत्र नैव काचित् स्वभूमिका लिखिता। न च कस्माच्चित् अनुशंसा लेखापयिता । तेन सफलतासफलतयोः निर्णयः पूर्णतया पाठकेभ्यः निवेदितम् । पुस्तकस्य मूलं मौलिक बौद्धिकतायाः परिचयः भवति।

## उत्तराखण्डसंस्कृत विश्वविद्यालयस्य दशमः दीक्षान्तसमारोहः

हरिद्वारस्थ-उत्तराखण्डसंस्कृत विश्वविद्यालयस्य दशमः दीक्षान्तसमारोहः उत्तराखण्डस्य माननीयराज्यपालस्यएवं कुलाधिपतेः लेफ्टिनेंट जनरल (सेखनिख) गुरमीत सिंहमहोदयस्य अध्यक्षतायां सम्पन्ना । यत्र आचार्यबालकृष्णं एवं पद्मश्रीः पूनमसूरीमहोदयां विश्वविद्यालयस्य पक्षतः



षविद्यावाचस्पतिः (डीखलिट्ख) 'मानद-उपाधिना अलंकारितम्। कार्यक्रमे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिना प्रोख श्रीनिवास-वरखेड़ी-महोदयेन आधारभाषणम्, विश्वविद्यालयस्य कुलपतिना प्रोखदिनेशचन्द्रशास्त्रीमहोदयेन स्वागतभाषणं प्रत्यावेदनं तथा कुलसचिवेन धन्यवादज्ञापनं च कृतम्। कार्यक्रमसंचालनं मया कृतम्। वैदिकमंगलाचरणं वेदविभागाध्यः डॉ अरुणकुमारमिश्रः अकरोत् । कुलगीतं स्वागतगानं च छात्रैः कृतम्। कार्यक्रमे मानयीय-राज्यपालेन कुलपतिना प्रो दिनेशचन्द्रशास्त्रीमहोदयद्वारा सम्पादितस्य मीमांसाभाष्यस्य( शाबरभाष्यस्य पं

शेषभागःअष्टमपुटे

## विष्णुं वर्णवपुं वन्दे छन्दोमालधरं विभुम्

**वसन्तकन्यास्नातकोत्तर महाविद्यालये ,कमच्छा-वाराणस्यां छन्दोगानकार्यशाला समारब्धा**

वाराणसी। छन्दःशास्त्राणां संस्कृतवाङ्मयस्य जीवने महत्वपूर्णभूमिका वर्तते।छन्दोभिः विना वेदानां संरक्षणम् अपि असम्भवं भवति। वेदानाम् अशीतौ पाण्डुलिपिषु एकमात्रम् अपि परिवर्तनं नास्ति एतत्



छन्दःशास्त्रस्य एव प्रभावः वर्तते। छन्दसः जटा ,माला, घन इत्येताः पाठविधाः एतत् सुरक्षाकवचं प्रदत्तवत्यः। एते विचाराः काशी हिन्दु विश्वविद्यालयस्य सहायकाचार्यः डा. राजेश सरकारः मुख्यातिथित्वेन व्यक्तवान् । कार्यशालायाः उद्देश्यं वदन्ती महाविद्यालयस्य संस्कृतविभागाध्यक्षा आचार्या शान्ता चटर्जी उक्तवती यत् संस्कृतस्य उच्चारणं शुद्ध रूपेण शिक्षयित्वा एव भाषायां स्वतः यतिगतिलयभावपुरस्सरं संगीतात्मिका च वर्तते।

येन कारणेन संस्कृतभाषा रसपूर्णा अस्ति। कार्यशालायाः सूत्रधारा संस्कृत मातृमण्डलस्य अध्यक्षा गङ्गारत्ना आचार्या कमला पाण्डेयः अस्मिन् अवसरे सर्वान् प्रतिभागिनः भगवती वाग्देव्याः आह्वानं कृतवन्तः। आरम्भे डॉ. तृप्ति यादव द्वारा वाणी वन्दना अथ च छात्राभिः मङ्गलाचरणं कृतम्।

येन कारणेन संस्कृतभाषा रसपूर्णा अस्ति। कार्यशालायाः सूत्रधारा संस्कृत मातृमण्डलस्य अध्यक्षा गङ्गारत्ना आचार्या कमला पाण्डेयः अस्मिन् अवसरे सर्वान् प्रतिभागिनः भगवती वाग्देव्याः सन्निकटम् आगमनस्य आह्वानं कृतवती। आरम्भे डॉ. तृप्ति यादव द्वारा वाणी वन्दना अथ च छात्राभिः मङ्गलाचरणं कृतम्।

# योगद्वारा जीवनपरिवर्तनमपि सम्भवति -डॉ0 रतनभारद्वाजः

डॉ० महेशकुमारपारिकः

जयपुरम्- राजस्थानस्य जयपुरे स्थिते सञ्जयशिक्षकप्रशिक्षण महाविद्यालये प्रतिवर्षमिव २०२३ तमस्य वर्षस्य जूनमासस्य २१ दिनाङ्के अन्तर्राष्ट्रीययोगदिवसस्य आयोजनं कृतम् । यस्मिन् महाविद्यालयपरिवारस्य शिक्षकाः छात्राः च भागं गृहीतवन्तः। कार्यक्रमस्य आरम्भः ओंकारेन सह अभवत। कार्यक्रमे जीवने योगस्य महत्त्वं महाविद्यालयस्य आचार्यः डॉ. रतनकुमार भारद्वाजः डॉ.



यशवन्ती गौडः च कथितवन्तः। सः अवदत् यत् योगं विना अस्माकं जीवने जडता, आलस्यं च उत्पद्यते। अतः सर्वैः जीवने उत्साहः, उत्साहः च जागृतुं नित्यं योगः करणीयः।

महाविद्यालयस्य ठोंकरोडस्थितपरिसरे अन्तर्राष्ट्रीययोगमहोत्सवाङ्गतया सम्मिलिताः विभिन्नपटवः मार्गदर्शकैश्च सह योगाचरणे रताः सन्ति। श्वेत सर्वे' समानी आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति इत्यादिभिः वचनैः सर्वे प्रेरिताः अस्मिन् अवसरे महाविद्यालयस्य प्रवक्ता डॉ. महेशकुमार पारीकेन विभिन्नमुद्राभिः सभागारस्य प्रदर्शनं कृतम्। येषु प्राणायामेषु अनुलोमविलोम, भ्रामरी वज्रसन, तादासन, कुर्मसान, शवासन, सूर्य नमस्कार च मुख्याः आसन् । तेनोक्तं यद् योगासनम् अस्माकं जीवनशैलीं पाठयति । अस्माभि स्वीयदिनचर्यायां योगासनं नूनमेवस्थापनीय। अनेन प्रकारेण कार्यक्रमे महाविद्यालयस्य छात्राध्यापकाः तथा महाविद्यालयस्य परिवारः उपस्थितः आसीत्।

---

प्रथमपुटस्य शेषभागः **उत्तराखण्डसंस्कृत विश्वविद्यालयस्य दशमः....**

गंगाप्रसाद-उपाध्याय कृतस्य हिन्दी-अनुवाद-सहितस्य) , डॉ विन्दुमतीद्विवेदीद्वारा लिखितं औपनिषद शिक्षादर्शनम् इति नामकस्य पुस्तकस्य तथा च विश्वविद्यालयस्य ई-शोधपत्रिकायाः क्मअईनउप श्रवनतदंस व िडनसजपकपेबपचसपदंतल त्मेमंतबी 'इत्यस्य लोकार्पणमपि कृतम् । अवसरेऽस्मिन् गुरुकुलकांगड़ीविश्वविद्यालयस्य कुलपतिः प्रो सोमदेवशतांशुमहोदयः, आयुर्वेदविश्वविद्यालयस्य कुलपतिः प्रो सुनीलजोशीमहोदयः, उत्तराखण्डमुक्तविश्वविद्यालयस्य कुलपतिः प्रो ओमप्रकाशनेगीमहोदयश्चोपस्थितः। एतैः साकं तत्र नैके कुलपतयः आचार्याः प्राचार्याः विद्वांसश्च समुपस्थिताः।

# योगविषयकं विशिष्टव्याख्यानं सुसम्पन्नम्

(वार्तासंयोजक- डॉ.दिनेश चौबे)

उज्जयिनीस्थेमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य प्राचीनयोगविज्ञानविभागस्य तत्त्वावधाने वैक्रमाब्दः २०८० आषाढकृष्णचतुर्दश्यां तदनु सप्तदशतमेदिनाङ्के शनिवासरे नवम् अन्ताराष्ट्रियोग दिवसस्ययोपलक्ष्ये विशिष्टव्याख्यानस्य आयोजनं विश्वविद्यालयस्य योगेश्वरश्रीकृष्ण योगभवनस्य सभागारे विश्वविद्यालयस्य माननीयकुलपतिः आचार्यविजयकुमारसीजीवर्यस्य संरक्षकत्वे अभूत्।







कार्यक्रमे सारस्वतातिथिरूपेण डॉ. निशाजोशीमहोदया योगविभागाध्यक्षा, श्रीजैनश्वेताम्बर आकादमी, अहिल्याविश्वविद्यालयः इंदौरनगरतः उपस्थिता आसीत्। महोदया श्रीमद्भगवदीतायाम् कर्मण्येवाधिकारस्ते इति श्लोकादारभ्य कर्मयोग-ज्ञानयोग-संन्यासयोग-विषये ज्ञानवर्धकं व्याख्यानं कृतवती। गीताप्रवृत्तिप्रधानग्रन्थो वर्तते। गीतायां भगवताकृष्णेन जीवनप्रबन्धस्य यानि सूत्राणि दत्तानि तानि स्वजीवने आचरणीयानि। अत्र विशिष्टातिथिरूपेण डॉ. उपेन्द्रखत्रीमहोदयः योगविभागाध्यक्षः, सांचीबौद्धविश्वविद्यालयः, भोपालसमीपतः उपस्थितः आसीत।महोदयःप्राकृतिकम्, आधिकारिकम्, वैयक्तिकम्, सामाजिकञ्चेति अनुशासनस्य चत्वारः प्रकाराः प्रतिपादितवान। निद्रा, बुभुक्षा, जागरणादिकम् प्राकृतिकमस्ति । प्रेरणां विनैव अत्र ध्यानं गच्छति । अतः नियतं कुरु कर्मत्वम। योगस्थः कुरु कर्माणि अपि च सिद्ध्यसिद्ध्योः समोभूत्वा समत्वं योग उच्यते । इत्यादीन् विषयान् सम्यक्तया उपस्थापित्वान्।

कार्यक्रमस्य शुभारम्भः वाग्देव्याः सरस्वत्याः समर्चनेन वैदिकमङ्गलाचरणेन च जातः। तदनु विश्वविद्यालयस्य छात्रैः कुलगानं प्रस्तुतम्। ततः वाचिकं स्वागतं प्रास्ताविकञ्च योगविभाग प्रमुखेन डॉ. उपेन्द्रभार्गवमहोदयेन कृतम् । व्याख्यानकार्यक्रमे सामाजिकाः, छात्राः ,शोधच्छात्राः विश्वविद्यालयस्य आचार्याः, कर्मचारिणः अन्यजनाश्च उपस्थिताः आसन् । कार्यक्रमौयं कुलसचिवः डॉ. दिलीपसोनी महोदयस्य मार्गदर्शने सञ्जातः। कार्यक्रमस्य सञ्चालनं, सुश्रीईशापाटीदारमहोदयाकृतवती। आभारप्रदर्शनं डॉ.वरुण आहुजामहोदयेन कृतम् कल्याणमन्त्रेण सह कार्यक्रमस्य समापनं जातम्।



# भागत्रयात्मिका शारीरकविमर्शात्मिका राष्ट्रियासंगोष्ठी सम्पन्ना

-डॉ० लक्ष्मीकान्तविमलः, नवदेहली

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन नवदेहलीस्थेन जूनमासस्य त्रिंशत्तमे दिनांके शारीरकविमर्श इति नाम्नी राष्ट्रिया संगोष्ठी अन्तर्जालीयमाध्यमेन सुसंपन्नता गता। पण्डितमधुसूदनओझामहोदयानां शारीरकविमर्शनामकस्य ग्रन्थस्य सप्तमं प्रकरणम् आधारीकृत्य सगोष्ठीयं समायोजिता। अस्यां संगोष्ठ्यां संपूर्णानन्द-संस्कृत-विश्वविद्यालयस्य मीमांसाविभागाध्यक्षः प्रो. कमलाकान्तत्रिपाठी विशिष्टवक्ता आसीत्। हिमाचल-प्रदेश-केन्द्रीय-विश्वविद्यालयस्य धर्मशालास्थितस्य संस्कृत-पालि एवं प्राकृतविभागस्य सहायकः आचार्यः डॉ. कुलदीप कुमारः वक्ता आसीत्। श्रीशंकर-शिक्षायतनस्य समन्वयकः जवाहरलाल-नेहरू-विश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानस्य आचार्यः सन्तोष कुमारशुक्लवर्यः कार्यक्रमस्य अध्यक्षः आसीत्।

शारीरकविमर्शस्य सप्तमे प्रकरणे शब्दमयवेदस्य पौरुषेयत्वविषये अपौरुषेयत्वविषये ४२ सिद्धान्ताः सुगुम्फिताः सन्ति। प्रकरणस्य आदौ वेदस्य पौरुषेयापौरुषेययोः, नित्यानित्ययोः, कृतकाकृतकयोः विचारः मीमांसादर्शनदृष्ट्या, सांख्यदर्शनदृष्ट्या, नव्यन्यायदर्शनदृष्ट्या, प्राचीनन्यायदर्शनदृष्ट्या, वैशेषिकदर्शनदृष्ट्या, नास्तिकदर्शनदृष्ट्या च कृतो विद्यते।

विशिष्टवक्ता प्रो. कमलाकान्तत्रिपाठी अवोचद् यत् शारीरकविमर्शे दर्शनशास्त्रस्य दृष्टिः अनेन प्रकारेण विद्यते- मीमांसा वेदस्य रचनाकारं न स्वीकरोति, महर्षिः वेदतत्त्वस्य साक्षात्कारं कृतवान्। वेदः नित्यः एवं स्वयंप्रादुर्भूतः अस्ति- 'अकर्तृका इमे वेदाः। महर्षयस्तु द्रष्टारो न कर्तारः।'

सांख्यदर्शनं वेदस्य अनित्यतां स्वीकरोति वेदश्च स्वयमुत्पन्नः। यथा अङ्कुरात् वृक्षः समुत्पद्यते यथा सूर्यचन्द्रमसौ स्वयम्युत्पद्येते तथैव वेदः अपि प्रकृतिनियमानुसारेण स्वयम् उत्पन्नः अस्ति। अतः वेदः अनित्यः -'वृक्षाङ्कुरादिवत् सूर्यचन्द्रादिवच्चौते वेदा अपि प्रकृतिनियमानुसारेण स्वयम् उत्पन्नाः। अत एव अनित्याः।'

नव्यन्यायदर्शनानुसारेण वेदः अपौरुषेयः अस्ति। वेदः कूटस्थनित्यात् प्रवाहनित्याच्च रहितः अत एव अनित्यः अस्ति।

प्राचीनन्यायदर्शनानुसारेण वेदः महर्षिणा प्रणीतः अत एव पौरुषेयः ख्र 'वेदा महर्षिकृता पौरुषेयाः।'

वैशेषिकदर्शनानुसारेण वेदः शब्दरूपः अर्थरूपश्च अस्ति। इति धिया वेदः शब्दव्यवहारसमये वाक्यप्रधानत्वात् महर्षिप्रणीतत्वात् पौरुषेयः अस्ति - 'वेदशब्दानां द्वेधा विवक्षा द्रष्टव्या । शब्दरूपेण चार्थरूपेण च । वेदशब्दव्यवहारे वाक्यप्रधानतायां वेदा महर्षिकृताः पौरुषेया अनित्या इति।'

नास्तिकदर्शनम् वेदस्य पौरुषेयत्वम् अनित्यत्वं च अङ्गीकरोति। पं. ओझामहोदयः लिखति यत् नास्तिकः वेदतत्त्वात् अनभिज्ञः अतः तस्य सिद्धान्तः अवैज्ञानिकः। अत एव अस्मिन् मते अधिकस्य विचारस्य आवश्यकता नास्ति । 'अथ षष्ठं नास्तिकानां वेदपदार्थान् अनभिज्ञानाम् अवैज्ञानिकं मतम् अस्ति इति असारत्वाद् अश्रद्धेयम् इति अत उपेक्ष्यते ।'

अस्मिन् विषये भाषमाणः डॉ. कुलदीपकुमारः ग्रन्थगतस्य ४२ सिद्धान्तानां दिग्दर्शनं कृतवान्सः अष्टाविंशतिसिद्धान्तम् अधिकृत्य कथितवान् यत् वेदः यज्ञश्च एकः अस्ति। ब्रह्म एव यज्ञः त्रयी (ऋक, यजुः और साम) विद्या यज्ञः अस्ति। अस्मिन् विषये शतपथब्राह्मणस्य वचनं ग्रन्थे उद्धृतः अस्ति-'ब्रह्म वै यज्ञः। सैषा त्रयीविद्या यज्ञः । एतावान् वै सर्वो यज्ञो यावनेष तयों वेदाः।'

स्वकीये अध्यक्षीये उद्बोधने प्रो. सन्तोषकुमारशुक्लः अवोचद् यत् शारीरकविमर्शे आत्मशास्त्रस्य पञ्चधा विभागः दरीदृश्यते। ते सन्ति- वेदशास्त्रम्, उपनिषच्छास्त्रम्, दर्शनशास्त्रम्, मीमांसाशास्त्रम् गीताशास्त्रम् । पं. मधुसूदनओझावर्यः वेदस्य स्वरूपविषये यादृशेण विस्तारेण प्रमाणपूर्वकेन विचारं कृतवान्, तादृशाः विचाराः संस्कृतसाहित्ये अन्यत्र नैवोपलभ्यन्ते।। वेदशास्त्रस्य प्रसङ्गः वेदस्य प्रवर्त्तकाचार्यस्य महती चर्चा ग्रन्थे उपलभ्यते। वेदशास्त्रस्य आदिप्रवर्तकः ब्रह्मा अस्ति। अस्य ब्रह्मणः स्वरूपम् अनेन प्रकारेण उल्लिखितम् अस्ति- 'परमकारुणिको विश्वगुरुः सर्वज्ञो हिरण्यगर्भ-ब्रह्मद्रष्टृतया हिरण्यगर्भसञ्ज्ञो ब्रह्मा विश्वकारण-विज्ञानोपपादकं ब्रह्मशास्त्रं लोके प्रचारयामास ।' संगोष्ठ्याः शुभारम्भः स्वशिष्यैः सह वेदाचार्येण डॉ. रवीन्द्र-ओझावर्येण कृतेन वैदिक- मङ्गलाचरणेन जातः समापनञ्च वैदिकशान्तिपाठेन अभूत्। संगोष्ठ्याः सञ्चालनं श्रीशंकरशिक्षायतन-वैदिकशोधसंस्थानस्य शोधाधिकारिणा डॉ.लक्ष्मी-कान्त-विमलेन तथा धन्यवाद-ज्ञापनं च डॉ. मणिशंकरद्विवेदिना कृतम्। देशस्य विविधेभ्यः विश्वविद्यालयेभ्यः, महाविद्यालयेभ्यः अन्य-शैक्षणिक-संस्थानेभ्यश्च शताधिकाः विद्वांसः शोधच्छात्राश्च सहभागितां कृतवन्तः।



# भारतसंस्कृतसमवायेन समायोजितं व्याख्यानं सम्पन्नम्

-डॉ. मणिशंकरद्विवेदी, नवदेहली

भारतसंस्कृतसमवायेन जूनमासस्य अष्टाविंशतितमे दिनांके लकारार्थविषयकं मासिकं व्याख्यानम् अन्तर्जालमाध्यमेन समायोजितम्। अस्य व्याख्यानस्य विषयः 'लकारार्थविवेचनम् उदाहरणकाव्यालोके' आसीत्। व्याख्यानमिदं गुजरातप्रान्तस्य अहमदाबादनगरस्य दर्शन-संस्कृत-महाविद्यालयस्य सहायकाचार्येण श्रीमता योगेशकुमार-एन्-पाण्ड्यामहोदयेन प्रदत्तम्।

लकारार्थविषये भाषमाणः श्रीमान् योगेशकुमार-एन्-पण्ड्यामहोदयः अकथयत् यत् संस्कृतव्याकरणे दश लकाराः सन्ति। एते लकाराः कालस्य द्योतकाः भवन्ति। लकाराणाम् अर्थः लकारार्थः। सः वर्तमानकालस्य चतुर्धा विभागं कृतवान्। (१)प्रवृत्तः उपरतः वर्तमानः, यथा बालकः माषं खादति। अस्मिन् वाक्ये भोजनस्य प्रारम्भः अस्ति परन्तु उपरतिः नैव निर्धारिता। (२) वृत्ताधिरताः, यथा अस्याम् अशोकवाटिकायां सीता अस्ति। अत्र सीता पूर्वकालात् एव अस्ति। (३) नित्यप्रवृत्तः, अत्र पर्वताः तिष्ठन्ति, पर्वताः पूर्वस्मिन् काले गतकाले अग्रिमे काले दृश्यते। (४) सामीप्यवर्तमानः, यथा एषः आगच्छामि, इत्यादयः प्रयोगाः काव्ये उपलभ्यन्ते। अनेन प्रकारेण तेन अनेकेभ्यः काव्येभ्यः लकारार्थविषयकानि नैकानि उदाहरणानि प्रदत्तानि।

व्याख्यानेऽस्मिन् विशिष्टातिथिरूपेण विराजमानः दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षः प्रो. ओमनाथविमलीमहोदयः वाक्यार्थं स्पष्टीचकार। तेनोक्तम् यत् शब्दस्य शब्दार्थस्य च विवेचनं भारतीयपरम्परायां प्रचुरेण जातम् तत्र शब्दार्थविचारे अखण्डवादस्य पक्षधरः वैयाकरणः, खण्डवादस्य पक्षधरः नैयायिकः अस्ति। समासशक्तिदृष्ट्या यदि विचारः क्रियते तर्हि एकार्थीभावः वैयाकरणस्य पक्षः, व्यपेक्षाभावः नैयायिकानां पक्षः। अन्विताभिधानमाध्यमेन अभिहितान्वयवादेन अपि अयं विषयः सुस्पष्टः भवति। यदि वाक्यस्य अर्थः मुख्यः स्यात् तर्हि वाक्यघटितस्य अन्वयस्य संबन्धस्य अपि आवश्यकता नास्ति ।

कार्यक्रमस्य अध्यक्षः डॉ. वाचस्पतिमिश्रः आसीत्, यः गुजरातप्रान्तस्य मगोदनामकस्थानस्य श्रीमुक्तानन्द-संस्कृत-महाविद्यालयस्य निर्देशकः अस्ति। स लकारार्थविषये कथितवान् यत् लकारस्य उपयोगः काव्ये शास्त्रे च भवितुम् अर्हति। स उदाहरणरूपेण कथितवान् यत् काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्, इति वाक्येन शास्त्रे अपि लकारस्य औचित्यं प्रतिभाति। तेन कथितं यत् वस्तुतः वक्ता पण्ड्यामहोदयः काव्यस्य एव उदाहरणस्य उपयोगं लकारार्थविचारे कृतवान्।



भारतसंस्कृतसमवायस्य समन्वयकः उत जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानस्य आचार्यः प्रो. सन्तोषकुमारशुक्लवर्यः निर्धारितविषयस्य विस्तारेण प्रकाशनं कृतवान्। तेन सारल्येण प्रतिपादितं यत् लट्, लोटादि लकारस्य अर्थः भवति अथवा लकारस्थाने तिङादिनाम् आदेशानाम् अर्थः जायते। नैयायिकाः लकारस्य अर्थं स्वीकुर्वन्ति परन्तु वैयाकरणाः लकारस्थानीयस्य लादेशानाम् अर्थम् अङ्गीकुर्वन्ति। यदा कश्चित् जनः वाक्यं वदति तदा लकारस्य स्थाने क्रियमाणस्य आदेशस्य स्पष्टं ग्रहणं भवति। अनया दृष्ट्या वैयाकरणस्य पक्षः प्रबलः दृश्यते।

कार्यक्रमोऽयं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधच्छात्रेण श्रीप्रवीणकोईरालामहोदयेन कृतेन वैदिकमङ्गलाचरणेन सञ्जातः। अस्मिन् कार्यक्रमे देशस्य विविधेभ्यः प्रान्तेभ्यः स्थितेभ्यः विश्वविद्यालयेभ्यः महाविद्यालयेभ्यः उत अन्येभ्यः शैक्षणिकसंस्थानेभ्यश्च अनेके विद्वांसः, शोधच्छात्राश्च सोत्साहं भागं गृहीतवन्तः।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

श्रावण मासस्य हिंदू धर्मे अधिकं महत्वम्। अस्मिन् मासे भगवच्छिवस्य पूजा आराधना विशेषेण विधीयते। श्रावण मासे अकालमृत्युं दूरीकर्तुं दीर्घायु प्राप्तये सर्वव्याधीन् दूरीकर्तुं विशेषेण पूजा क्रियते। मारकंडोः ऋषेः पुत्रः मार्कंडेयः दीर्घायुषे श्रावणमासे घोरां तपस्यां कृत्वा शिवकृपा प्राप्तवान्, येन प्राप्त मंत्र शक्तीनां समक्षं मृत्यु देवः यमराजः नतमस्तकः जातः। हिंदू पंचांगस्य अनुसारम् अस्मिन् वर्षे पञ्चमप्यः मासः। आङ्ग्लपञ्चाङ्गानुसार श्रावणमासः जुलाई-अगस्तमासयोः आयाति स अस्मिन् मासे सोमवार व्रतं, सावन स्नान परंपरा च वर्तते स श्रावण मासे विल्वपत्रेण भगवान् भोलेनाथः पूजनीयः तस्मै जलस्य अर्पणीयमिति च अत्यंत फलदम्। शिव पुराणानुसारं यः जनः अस्मिन् मासे सोमवार व्रतं करोति, भगवान् शिवः तत्समस्त मनोकामनाः पूर्णी करोति। श्रावणे लक्षशः श्रद्धालवः ज्योतिर्लिंग दर्शनाय हरिद्वारं, काशी, उज्जैनं, नासिकं च समेत्य भारतस्य बहूनि धार्मिक स्थलानि यान्ति। श्रावणस्य प्रकृत्या सह गहन संबंधः यतः अस्मिन् मासे वर्षर्तुकारणेन संपूर्ण पृथ्वी वृष्ट्या हरिता जायते। भारतीयेषु पश्चिम तटीय राज्येषु श्रावण मासस्य अंतिम दिने नारिकेल पूर्णिमा समाचर्यते। श्रावणस्य पावन दिनेषु एव शिव भक्तानां द्वारा कावड़ यात्रा आयोज्यते तत्र लक्षशिवभक्ताः देवभूमि उत्तराखंडे स्थितस्य शिव नगरी हरिद्वारस्य गंगोत्री धाम्नश्च यात्रां कुर्वते। श्रावणस्य ज्योतिषमहत्व एतत् यत् श्रावण मासस्य प्रारंभे सूर्य राशि परिवर्तनं कुरुते। सूर्य गोचरात् अपि द्वादश राशयः प्रभाविताः भवन्तिस

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

'स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥'

'O! Young God Agni! The man who invokes Lord Agni that guides and inspires one in the best of ways, knows and gains His Grace and favour. The Lord makes all his days prosperous and good. He grants him wealth of cattle and priceless treasures..He shines upon his dwelling and looks after his well-being.'

The Rig Veda 4.4.6

'सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ॥'

'Whatever path we may take in life, let it be always simple, straight and free of thorns. May our food, ghee and other such items be sweet and fit for consumption. O !Lord Agni, God of Fire, You are our Guide and friend. May our fortune never be impaired. On the other hand, may You bless us with a dwelling full of ample riches and food.'

The Rig Veda 3.54.21

संकलन : एस.वासुदेव रावः

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# सत्यमेव रसवत्फलम्

-डा. रामेश्वर प्रसाद गुप्तः (से.नि. प्राध्यापकः )
उद्योगविभागस्य समीपे, सिविल लाइन्स,
दतिया (म.प्र.)

**यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।।**
**(चाणक्यनीतिः)**

यौवनमपि रसप्रदं नास्ति, रसात्मकं नास्ति वा । धनसम्पत्तिरपि चिन्तामेव जनयति न तु सौख्यम्। 'कलहं जनयति धनं' इति व्यवहारे जीवने वा द्रष्टुं शक्यते। प्रभुत्वं पदं वा महाभिमानमुत्पादयति सम्माननीयानां जनानामवहेलनां प्रभुत्वकारणेनैव जनः करोति। अविवेकिता मूर्खताऽस्ति ययाभिभूतः जनः विनश्यति, इति जानन्ति सर्वे। स्पष्टमस्ति यत् यौवनं, ध नं, प्रभुत्वम् अविवेकिता च विनाशाय अनर्थाय वा भवन्ति, किन्तु सत्यमिदमप्यस्ति यत् सर्वे मानवाः प्राणिनश्च यौवनं, धनं प्रभुत्वं च वाञ्छन्ति। वस्तुतः कदा यौवनं धनसम्पत्तिः प्रभुत्वं यशः विनाशयन्ति

अनर्थं कुवन्ति वा? उत्तरं सुस्पष्टमस्ति-

**'आपदां कथितः पन्था इन्द्रियाणामसंयमः ।**
**तज्जयः सम्पदां मार्गः येनेष्टं तेन गम्यताम्॥**

तदैव धनसम्पत्तिः यौवनं वा प्रभुत्वं वा अनर्थं करोति यदा जनः संयमरहितः भवति इन्द्रियाणां दासः वा भवति । इन्द्रियाणि तु कामान् जनयन्ति, कामवासनाभिः विमूढता आयाति, ज्ञानं तदा तिरोहितं भवति। गीतायां स्पष्टमस्ति यत्-

**आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।**
**कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥**

(श्रीमद्भगवद्गीता - 3-39)

तथा च-

**इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।**
**एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥**

(श्रीमद्भगवद्गीता-3-40)

कामेनावृतः जनः पापं करोति । अर्जुनेन पृष्टः श्रीकृष्णः यत् भगवन्! केन प्रयुक्तोऽयं जनः पापं चरति ? श्रीकृष्णेन स्पष्टं कृतं यत्-

**काम एष क्रोध एष रजोगुणसमुद्भवः ।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥**

(गीता-3-37)

'कामः' कामः इच्छा वा मनुष्यस्य महाशत्रुरस्ति। मायायाः प्रथमः पुत्रः इति प्रसिद्धमेव। मायायाः अयं पुत्रो जनानां चित्तं मोहाय प्रयच्छति उल्लेखः विद्यते दुर्गासप्तशत्यामेवं-कामेनाभिभूतः जनः क्रोधसंयुक्तः भूत्वा विवेकहीनः भवति विनश्यति च ।

**ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।**
**बलादाकृष्य मोहाय महामाया प्रयच्छति ॥**

यथोल्लेखः-

**'ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥**
**क्रोधाद्भवति संमोहः संमोहास्मृतिविभ्रमः ॥**
**स्मृतिभ्रंशाद् बुद्धिनाशो, बुद्धिनाशात्प्रणश्यति ।**

(गीता-2-61, 63)

तर्हि किं कर्तव्यं इत्यत्र प्रश्नः ? वेदव्यासेन उत्तरं प्रदत्तं यत्-

**जहि शत्रु महाबाहो कामरूपं दुरासदम्।'**

(गीता-3-43)

वस्तुतः अहंकारविमूढात्मा मन्यते यत् अहमेव कर्ता अस्मि अहंकारस्तु शोकप्रदः भवति। महाकवि तुलसीदासः कथयति यत्-

**सकल शोकदायक अभिमाना।** रा.च.मा.

अन्यत्रापि कथितम्- काम क्रोध मद लोभ सब नाथ नरक के पंथ

(सुन्दरकाण्ड रा.च.मा.)

एवमपि उक्तं यत्-

**शोकधाम तज काम** (सुन्दरकाण्ड रा.च.मा.)

कामान् त्यक्त्वा यदा नरः शनिरभिमानीश इति भवति तदैव सः शान्तिं प्राप्नोति यथोक्तम्-

**विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।**
**निर्ममो निरहंकारः स शान्तिमधिमच्छति ।** (गीता 2-7)

अन्यत्रापि उक्तम्-

**अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।**
**स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥**

(गीता-6-1)

कामः तदा तिरोहितः भवति यदा जनः संयतात्मा भवति । अभ्यासेन वैराग्येण च संयतात्मा भवति जनः कामस्योद्भवस्थानं मनः अस्ति । मनः दुर्निग्रहं चञ्चलं च भवति । अत एव अभ्यासेन वैराग्येण च मनः गृह्यते। विषयेऽस्मिन् गीतायां स्पष्टं कृतं यत्-

**असंशयं महावाहो मनो दुर्निग्रहं चलम् ।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**

(गीता 6-35)

कर्मफलं प्रति यदा आसक्तिः न भवति तदा यौवनसम्पन्न, धनसम्पत्तियुतः पदेन प्रतिष्ठितः च जनः विवेकबुद्धियुतः एव भवति । सः योगिवद्व्यवहारं करोति तथा च अस्मिन् संसारे जीवन्मुक्तः भूत्वा चरति । सः तु आत्मज्ञानी एव भवति । आत्मज्ञानाय विनम्रता सम्यक् साधनमस्ति । गीतायामपि उक्तम् यत्-

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया** (गीता- 5-34)

प्रणिपातः विनम्रता अस्ति, परिप्रश्नस्तु जिज्ञासास्ति सेवाकार्यं श्रेष्ठ निःस्पृहकर्तव्यमस्ति । आत्मबोधाय अलं एते गुणाः। एतेषां गुणानामाधारः केवल 'सत्यं' इति अस्ति । वेदेषु समयवैदिकसाहित्ये वा केवलम् एकशिक्षा एवाचरणाय निर्दिष्टा वर्तते । कथितं शतपथब्राह्मणे, यत्- स वै सत्यमेव वदेत्। शतपथब्राह्मण-1-1-1-5

एवमेव विष्णुपराणे निगदितम्-

**अश्वमेधसहस्राणि सत्यं च तुलया धृतम् ।**
**अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते॥**

उपनिषत्सु सर्वधर्माणां कर्मणां च सारस्वरूपं ज्ञाननवनीतं अनेन प्रकारेण प्रकटितम् यत् -

'सत्यमेव जयते।' (मुण्डकोपनिषद्)

अष्टादशपुराणेषु यत् श्रेष्ठं पुराणं भागवतपुराणमस्ति, तत्रापि सत्यस्य महत्ता एवमेव प्रतिपादित यत्-

**सत्यं परं धीमहि** (भागवत-1-1-1)

पञ्चतन्त्रेऽपि निगदितम् यत्- सत्यान्नास्ति परो धर्मः महाकविगोस्वामितुलसीदासेनापि एवमेव कथितम्, यत्-

**धर्म न दूसर सत्य समाना**

निष्कर्षोऽयमस्ति यत् कामादयो ये विकाराः सन्ति, ते तु मनुष्याणां वैरिणः सन्ति तेषां निराकरणार्थाय परिहारार्थं वा सत्यस्याश्रयमेव भजेत्। सत्यमेव निःश्रेयसाय सदाचरणीयं वर्तते। धर्मार्थकाममोक्षप्राप्त्यर्थं सत्यं सदाचरणं वा श्रेयस्करं आधारमूलमस्ति। अतएव अस्मिन् संसारे एकमेव रसवत्फलम् अस्ति। नूनं तदस्ति केवलं 'सत्यम्'।



# भारतीय-ध्वनिशास्त्रे स्वरभक्तिविमर्शः

-प्रोफेसर श्रीकृष्णः शर्मा
पूर्व-निदेशकः
संस्कृत-प्राच्यविद्या संस्थानम्
कुरुक्षेत्र- विश्वविद्यालय
कुरुक्षेत्रम् (भारतम्)

वेदमन्त्राणां शुद्धोच्चारणेन, अर्थावबोधेन, पदस्वरूपसंरक्षणेन, यथाविधि विनियोगेन च वेदरक्षार्थं यथासमयं प्राचीनैराचार्यैर्विरचितेषु शिक्षा-व्याकरण-निरुक्त-छन्दो-ज्योतिष-कल्पाभिधानेषु षट्त्सु वेदाङ्गेषु ध्वनिविज्ञान-परायणं शिक्षानामकं वेदाङ्गं महनीयं स्थानं बिभर्ति । यद्यपि शमुखं व्याकरणं स्मृतम्श इति प्रतिपादयता शिक्षाकारेण व्याकरणशास्त्रस्य महत्त्वं महता कण्ठरवेण उद्घोषितम्, किन्तु शिक्षाशास्त्रं व्याकरणशास्त्रस्य अनुशीलने प्रथमं सोपानं विद्यते।[1] यतो हि वर्णोच्चारण-प्रशिक्षणाभावे वर्णोच्चारणवैकल्याद् व्याकरणशास्त्रमपि बधिरकल्पायते । अथ च, वेदपुरुषस्य नासिकास्थानीयं शिक्षाशास्त्रं मुखस्थानीयस्य व्याकरणशास्त्रस्य सौन्दर्याधायकं कथयितुं शक्यते, यतो हि मानवीय मुखस्य सौन्दर्यनिर्धारणे नासिकाया महती भूमिका वर्तत इति पांसुलपादस्य हालिकस्यापि तिरोहितं नास्ति ।

शिक्षाशब्दस्य अर्थः

शिक्षाशब्दो विद्योपादानार्थकात् ण्यन्तात् शशिक्षश धातोर्निष्पद्यते । शशिक्षयति इति शिक्षाश इति व्युत्पत्तिलभ्यमर्थमाश्रित्य शिक्षाशब्दः पूर्णतया यौगिकः सन्नपि वर्णोच्चारणशिक्षणप्रदायके शास्त्रविशेषे रूढः सञ्जातः[2] । यदाह भाष्यकार आचार्यः सायण ऋग्वेदभाष्य- भूमिकायाम्- “वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा[3] इति । शिक्षाग्रन्थेषु शब्दोत्पत्ति-वर्णोच्चारण- वर्णविभागोच्चारणस्थान- प्रयत्न- प्रभृतीनां ध्वनिशास्त्रीयविषयाणां निरूपणं कुर्वद्भिः शिक्षाशास्त्रिभिः प्रदर्शिताः स्वरभक्ति - तत्स्थितिस्वरूपोच्चारणविषयका नैके प्रसङ्गाः सुतरां रुचिकराः प्रतीयन्ते । प्रातिशाख्येषु शिक्षाग्रन्थेषु च समुपलब्धान् एतान् ध्वन्यात्मकप्रसङ्गान् आधृत्य स्वर - भक्तिविश्लेषणमेव प्रस्तुतस्य शोधपत्रस्य प्रतिपाद्यो विषयो वर्तते ।

स्वरभक्तेः स्वरूपम्

स्वरभक्तिरिति अन्वर्थक पारिभाषिकं पदं विद्यते । भवति चात्र विग्रहः शस्वरस्य भक्तिः आश्रयणम्श इति स्वरभक्तिः । विशिष्टदशायां वर्णोच्चारण-सौकर्याय कस्यचिद् विशिष्ट स्वरस्य आश्रय एव स्वरभक्तिपदवाच्यो भवति । सोऽयम् आश्रितः स्वरः कस्यां दशायां प्रयोजनीयो भवति, अस्य स्वरूपम् उच्चारणं वा कीदृक् स्याद्-इत्यत्र ध्वनिशास्त्रिभिर्बहुविचारितं स्वस्वमनीषया ।

ऋग्वेदप्रातिशाख्य आचार्यः शौनकः स्वरपूर्वकात् व्यञ्जनपरकाद् रेफात् परे ऋकाररूपां स्वरभक्तिमुपदिशति[4] । तत्र उवटकृतव्याख्यानाद् इदमधिकं विज्ञायते यद् ऋकारलृकारवर्णयोर्मिथः सावर्ण्याद् ऋकाररूपास्वरभक्तिवद् लृकाररूपा स्वरभक्तिरपि फलति[5]। एवं श्यदद्य कर्हि कर्हिचत्' (ऋग्, 8.73.5) इत्यादिषु स्थलेषु 'कर्हि' इत्यस्य उच्चारणं 'कर् ऋ हि' इत्येवं भवति तथा 'अर्चन्त्यर्कमर्किणः' (ऋग् 1.10.1)इत्यत्र 'अर् ऋ चन्त्यर् ऋ कमर् ऋ किणः' इत्येवं भवति। किन्तु 'आष्ट्र्याम्' (ऋग 10.165.3) इत्यत्र रेफस्य स्वरपूर्वकत्वाभावाद् अथ च 'सुरूपकृलुम्' (ऋग् 1.4.1) इत्यत्र रेफस्य व्यञ्जनपरकत्वाभावाद् स्वरभक्तिर्नैव प्रयुज्यते। शौनकमते तु स्वरपूर्वकाद् रेफात् (लकाराच्च) परे सर्वेष्वपि व्यञ्जनवर्णेषु सत्सु स्वरभक्तिः प्रयुज्यत एव, किन्तु कतिपयेऽनुदारवादिन आचार्या अत्र प्रबलं[6] विवदन्ते । ततश्च प्रातिशाख्येषु शिक्षाग्रन्थेषु च स्वभक्तेर्विषयो रेफाद (लकाराच्च) परे सत्सु ऊष्मवर्णेषु एव नियम्यते। सम्भवतः शौनकोऽपि एतत् नियमनं मौनेन स्वीकरोति।

ऋग्वेदप्रातिशाख्यस्य प्रसङ्गेन इदं विज्ञायते यद् आचार्यः शौनकः स्वरभक्तेर्द्वैविध्यम् अभिप्रैति-दीर्घा स्वरभक्तिश्चेति। रेफाद् (लकाराद्वा) ऊष्मवर्णस्य सामान्ये संयोगे सति दीर्घा स्वरभक्तिः कथ्यते[7], रेफाद् (लकाराद्वा) द्विरुक्तस्य ऊष्मवर्णस्य संयोगे सति ह्रस्वा चेति व्यवस्था[8]। दीर्घस्वरभक्तेरुच्चारणकालोऽर्धमात्रासदृशः, ह्रस्वस्वरभक्तेश्च उच्चारणकालश चतुर्थांश मात्रातुल्य इति भेदः।[9] पश्चाच्च नैकेषाम् आचार्याणां[10] मते द्विरुक्तोष्मवर्णसंयोगे स्वरभक्तिर्विरोधदर्शनात् परवर्तिनो ध्वनिशास्त्रिणो रेफाद् (लकाराद्वा) केवलम् असंयुक्तोष्मवर्णसंयोग एव स्वरभक्तिप्रसङ्गमनुमोदिरे।

तैत्तिरीयप्रातिशाख्ये स्वरभक्तेः क्षेत्रं पर्याप्तं संकुचितमुपलभ्यते। तदनुसृत्य रेफस्य (लकारस्य च) ऊष्मवर्णेन संयोगे सति रेफसदृशी (स्थानप्रयत्नदृशा रेफतुल्या ऋकाररूपा इत्यर्थः) स्वरभक्तिर्विधीयते।[11] ऋकाररेफयोः स्थानकरणसाम्यदर्शनाद् रेफप्रयोग ऋकारे पर्यवसीयते । तत्र ऋकाररूपा स्वरभक्तिर्भवतीति तत्त्वम्[12]

शुक्लयजुःप्रातिशाख्ये कात्यायनस्तु रेफात् लकाराच्च स्वरपरक ऊष्मवर्णे सति यथासंख्यम् ऋकारम् लृकारं च स्वरभक्तिमाह।[13]

अथर्ववेदप्रातिशाख्ये रेफात् परे स्वरपरक ऊष्णवर्णेऽकारस्य अर्द्धभागेन सदृशी स्वरभक्तिर्विधीयते । वर्षीयस्, वर्ष :- इत्यादीनि सन्ति निदर्शनानि[14]। वर् अ/2 षीः, वर् अ / 2र्षः इति व्यासः ।

याज्ञवल्क्यशिक्षायां स्वरभक्तेः स्थितिः स्वरूपं च विशदतया निरूपिते स्तः । तथा च तत्र पाठः-

रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरोदयाः ।
स्वरभक्तिरसा ज्ञेया पूर्वमाक्रम्य पठ्यते ।।
स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत्।
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ।। २.१७-१८

केशवीशिक्षायां स्वरभक्तिविषयकं प्रतिपादनमेवमुपलभ्यते-

'अहल्शल्पूर्ध्वरेफस्य सैकारः प्राक् च।' पद्यक्रमांकः 4

अत्रायमाशयो यत् अहल्परके (अर्थात् स्वरपरके) शलि ( परे सति ) ऊर्ध्वगामी रेफ एकार-सहित उच्चारणीय इति। अत्र व्याख्याने सवर्णसंज्ञकत्वात् रेफे वक्तव्ये लकारोऽपि ग्राह्य इत्यधिकं ज्ञेयम्। एतदनुसृत्य स्वरभक्तिमाश्रित्य 'दर्शतम् झ दरेशतम्, पर्शव्येन झ परेशव्येन, शतवल्शः झ शतवलेशः, वार्षीत झ वारेषीत्' इत्येवमुच्चारणीयं भवति ।

लघुमाध्यन्दिनशिक्षा[15] स्वरभक्तिशिक्षा[16] च केशवीशिक्षासम्मतं वर्णनमेवानुसरतः । वर्णरत्नदीपिकाशिक्षायां रेफाद् लकाराद्वा स्वरपरके ऊष्मवर्णे स्वरभक्तिसमाश्रयेण रेरूपं लेरूपं वा उच्चारणमुपदिश्यते। तत्र एकारः स्वरभक्तिरिति तत्त्वम्[17]।

नारदीयशिक्षायां तु प्रकृतदशायाम् ऋकाररूपा स्वरभक्तिः शिष्टा मन्यते, इकाररूपा उकाररूपा वा स्वरभक्तिः सर्वथा निषिध्यते[18]।

उपरिप्रदर्शितेन विवरणेनेदं निष्कृष्यते यद् अन्तस्थवर्णान्तःपातिनो रेफाद् लकाराद् वा परे प्रबलवायुप्रहारेण निष्पन्नानाम्, कष्मवर्णानां सन्निधिना सम्पद्यमानं संयुक्तवर्णानां कठिनम् उच्चारणं सरलीकर्तुमेव मुखासुखार्थं कस्यचित् स्वल्पस्य स्वरस्य आश्रयणं स्वरभक्तिरित्युच्यते। तथाभूतः समाश्रितः स्वरः कण्ठ्यः, मूर्धन्यः कण्ठतालव्यो वा स्याद् इत्यत्र भारतीया ध्वनिशास्त्रिणो यथामतं विवदन्ते। अयं मतभेदो वैदिकशाखागतम् उच्चारणवैशिष्ट्यमवलम्बते अथवा क्षेत्रीयमुच्चारणवैशिष्ट्यमेव हेतुष्टयनशास्त्री नानाप्रकारकाणां स्वरभक्तीनामुल्लेखेन इदं तथ्यं स्फुरति यत् तत्र तत्र प्रयुज्यमानासु उपभाषासु नानाविधाः स्वराः। प्रयुज्यन्ते स्म । ततश्च शिक्षाग्रन्थेषु कतिपयस्वराणां स्वरभक्तिरूपे प्रयोगदर्शनाद् इदं निश्चीयते यत् प्राचीनाः शिक्षाशास्त्रिणः स्वरभक्तेः परिनिष्ठितरूपं निर्धारयितुम् इच्छन्ति स्म, किन्तु स्वरभक्तेः परिनिष्ठतरूपनिर्धारण दुष्करम् एवं फलितम्, तंत्र मतभेददर्शनात्[19] । पूर्वप्रदर्शितेषु संयुक्तवर्णस्थलेषु प्रयुज्यमाना स्वरभक्तिरत्यल्पस्वररूप एवं उच्चार्यते स्म । ध्वनिशास्त्रिण एनां स्वरभक्तिं प्रायः कण्ठतालव्याम् एव स्वीचक्रुः।

स्वरभक्तर्भेदाः

रेफात् लकाराच्च चतुर्णां श-ष-स-ह वर्णानां संयोगे सति अष्टविध । स्वरभक्तिः फलिता भवति । किन्तु रेफात् परे दन्त्यसकारस्य पत्वे सति अथ च सहितासु लकारात् परं मूर्धन्यषकारस्य दन्त्यसकारस्य च प्रयोगानुपलब्धेः सर्वमाहत्व त्र्यो भेदा हीयन्ते। एवं पञ्चप्रकारैव स्वरभक्तिरिति प्राप्यते । याज्ञवल्क्यशिक्षायामेताः पञ्च स्वरभक्तय एवमुपदिश्यन्ते-

करिणी कुर्विणी चौव हरिणी हरिता तथा ।
तद्वद् हंसपदा ज्ञेयाः पञ्चौताः स्वरभक्तयः ।।
हरिणी रशयोयोंगे हरिता लशकारयोः ।।
करिणी रहयोयोंगे कुर्विणी लहकारयोः ।
या तु हंसपदा नाम सा तु रेफषकारयोः ।।
याज्ञ० १२.१३-१५

स्वरभक्तिशिक्षायामपि (36-40 ) तथाविधमेव नामकरणं सोदाहरणं यथातथं प्राप्यते ।

वर्णध्वनिषु स्वरभक्तेः स्थानम्

अत्रेयं समुत्पद्यते यद् स्वरभक्तिः स्वरेषु परिगणनीया उताहो व्यञ्जनेपुर अत्र शौनकस्य श्न इति कथन महत्त्वपूर्ण वर्तत। अत्रायमायो यत् स्वरभक्तिप्रयोगे सति संयोगे संयुक्तस्थले न किमपि हीयते, अथ च तत्र संयोगजन्यानि कार्याणि यथावत् प्रवर्तन्ते। अनेनेदं ध्वन्यते यद् आचार्यः शौनकः स्वरभक्ति प्रायः स्वरेष्वेव परिगणयति यतो हि तत्प्रयोगे संयोगस्य स्वरूप विकृतं नैव सम्पद्यते। शस्वरभक्ति रिति नामकरणमपि एतदेवसमर्थयति यद् अस्याः परिगणनं स्वरेष्वेव कर्तव्यमिति। शौनकस्य शस्वरभक्तिः पूर्वभाग अक्षराङ्गम्श इति कथनं स्वरभक्तेः स्थिति पर्याप्तं विशदयति । अस्य कथनस्यायमाशयो यत् स्वरभक्तिः पूर्ववर्तिना रेफेण लकारेण वा सम्बद्धा भवति तद्गतस्य अक्षरस्य (स्वरस्य) अगं च भवति सूत्रमेतद् उवट एवं व्याचष्टे- “पूर्व रेफ लकार वा भजते, रेफादा लकाराद्वा यस्माद् व्यञ्जनाद उत्तरा भवति तत्सहिता पूर्वस्य स्वरस्याङ्ग भवतीत्यर्थः।”

आचार्यः शौनक एकेषाम् आचार्याणाम् मतमुपन्यस्यति[20] यत् स्वरभक्तिः पूर्ववर्तिना स्वरेण अथ च उत्तरवर्तिना स्वरेण साम्यं भजते। तदनुसृत्य 'धूर्षदम्' (ऋग् १.१४३.७) इति पदं 'धूरूषदम्' तथा च 'बर्हिषदः' (ऋग् 9.68.1) इति पदं बरिहिषदः' इत्येवमुच्चारणीयम् भवति। अत्रायं निर्गलितोऽर्थो यत् स्वरभक्तिरत्यल्पस्वररूपा भवति या पूर्वोत्तरयोरुभयोरपि अङ्गं भवति। अत्रेदं महत्त्वपूर्ण कथनं वर्तते यत् स्वरभक्तिप्रयोगे संयोगो नैव विहन्यते।

निष्कर्षः

स्वरभक्तेः स्थितिं क्षेत्रम् उच्चारणादिकं चाधृत्य प्रकृते विश्लेषणे योऽपि निष्कर्णः प्राप्यते तत्र नैकाः शङ्का अपि आपतन्ति यासां समाधानं दुष्करमिव प्रतीयते। तथा हि, अन्तरस्थरेफसहिते वर्णसंयोगे जायमानम् उच्चारणकाठिन्यमपनेतुं सर्वैरपि ध्वनिशास्त्रिभिः ऐकमत्येन स्वरभक्तिरनुमोद्यते, किन्तु रेफाद्वा लकाराद्वा द्विरुक्तेषु ऊष्मवर्णेणु सत्सु 'वर्ष्यान्' (ऋग् 5.83.2), 'आर्ष्टिषेणः' (ऋग् 10.98.5) इत्यादिषु कठिनस्थलेषु आचार्य - शौनकेन उपदिष्टा स्वरभक्तिरपरैराचार्यैः कुतो निषिध्यते[21], एतादृशेषु संयुक्तस्थलेषु स्वरभक्तिर्नितरामिष्यते । एवमेव प्रातिशाख्येषु विहिता ऋकाररूपा लृकाररूपा वा स्वरभक्तिः शिक्षाग्रन्थानां काले प्रायः एकाररूपा कथमजायत? अपरञ्च, स्वरभक्तिसमूहस्य 'करिणी' इत्यादीनि नामानि चापि विचारणीयानि सन्ति । तासां नामकरणे को हेतुः इति हृदयम् । असंशयम्, स्वरभक्तिविषया एता जिज्ञासा गहनं चिन्तनमर्हन्ति। इदं तु सुनिश्चीयते यद् वर्णनिष्पत्तिगतक्रमिकप्रक्रिया, संहितानाम् उच्चारणविषयकं शाखागतं वैशिष्ट्यम्, प्रादेशिक भाषाणां स्थानीयः प्रभावः इत्येवंविधेषु हेतुष्वेव सर्वासां शङ्कानां समाधानमन्वेष्टव्यं सुधीभिरिति शम् ।

सन्दर्भः

1. मुण्डकोपनिषदि वेदांगग्रन्थेषु शिक्षा प्रथमस्थान उल्लिखिता दृश्यते । तथा हि तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषम् इति । मुण्डक, 1.1.5
2. द्र0 शिक्षा स्वरवर्णोपेदशकं शास्त्रम् । ऋग्वेदप्रातिशाख्ये, 1.4 वर्गद्वयवृत्तिः ।
3. ऋग्वेदभाष्यभूमिका, पृ० 109
4. रेफात् स्वरोपहिताद् व्यञ्जनोदयाद् ऋकारवर्णा स्वरभक्तिरुत्तरा । ऋग्वेदप्रातिशाख्ये, 1.32 उवटभाष्यम् ।
5. रेफादुत्तरा रेफसदृशी भवति लकारादुत्तरा लकारसदृशी भवति । ऋग्वेदप्रातिशाख्ये, 1.32 : उवटभाष्यम्।
6. सर्वत्रैके स्वरभक्तेरभावम्। ऋग्वेदप्रातिशाख्यम्, 6.50
7. द्राघीयसी तूष्मपरा। तत्रैव, 6.40
8. इतरा क्रमे । तत्रैव, 6.49
9. द्राघीयसी सार्धमात्रा। तत्रैव 1.33 : अर्धेनान्या । तत्रैव, 1.35
10. द्रष्टव्या टिप्पणी 6
11. रेफोष्मसंयोगे रेफस्वरभक्तिः। तैत्तिरीयप्रातिशाख्यम्, 21.15
12. योऽस्य रेफस्य समानकरणः स्वरः तद्भक्तिः स्यात। ऋकारश्चास्य जिह्वाग्रकरणत्वेन रश्रुत्या च समानधर्मः। तैत्तिरीयप्रातिशाख्ये, 21.15 : त्रिभाष्यरत्नम्।
13. रलावृलृवर्णाभ्याभूष्मणि स्वरोदये सर्वत्र । शुक्लयजुःप्रातिशाख्यम् ।।4.17
14. रेफादूष्मणि स्वरपरे स्वरभक्तिरकारस्यार्धं चतुर्थमित्येके ।। अथर्ववेद- प्रातिशाख्यम्, 1.101
15. रेफो रेफत्वमाप्नोति शषहेषु परेषु च।
दवर्श वर्षोऽर्हाच्च संयोगे नैव कारयेत् ।।
वर्ष्म-वर्ष्यायान्तर्हृदा तत्र तावदुदाहृतिः ।
लकारोऽपि च सावर्ण्यादेकारसदृशो भवेत्।
शतबल्शा च बल्हा च तत्र तावदुदाहृतिः।। पद्यक्रमांकाः, 11-13 लघु. मा. शिक्षा
16. ऊष्मोर्ध्वरेफस्योच्चारः सैकारो हल्युतो न चेत्।।
शिक्षासंग्रहः, पृ. 144 स्वरभक्तिशिक्षा 18
17. स्वरभक्तिश्च पूर्वागं देवम्बर्हिरुदाहृतिः।
इकारे च तथोकारे च तां यत्नेन विवर्जयेत्।
रेफो वाथ लकारो वा यत्रोष्मणि स्वरोदये।
स्वरभक्तिर्भवेत्तत्र पूर्वमाक्रम्य पठ्यते ।।
ऊष्मणामुपरिस्थस्तु रेफो याति रेवर्णताम्।
रेफत्वं पुनरायाति यद्यूष्माणोऽन्यसंयुताः ।। वर्गरत्नप्रदीपिका, 52-54
18. शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदसन्धौ ।
इउवर्णाभ्यां हीना क्वचिदेकपदा क्रमवियुक्ता ।।
स्वरभक्तिर्द्विविधा त्वृकारो रेफ एव च । । नारदीयशिक्षा, 2.6-7
19. द्र. सिद्धेश्वरवर्माः प्राचीनभारतीय वैयाकरणों के ध्वन्यात्मक विचारों का विवेचनात्मक अध्ययन, पृ. 156
20. पूर्वोत्तरस्वरसरूपतां च । ऋग्वेदप्रातिशाख्यम्, 6.53 अत्र उवटः शपूर्वस्वररूपतां चोत्तरस्वरसरूपतां च स्वरभक्तेरेक आचार्या मन्यन्ते । न केवलम् ऋकाररूपा स्वरभक्तिर्भवतीत्यर्थः । 'धूर्षदम्' इत्यूकाररूपा स्वरभक्तिः। 'बर्हिषदः' इति इकाररूपा स्वरभक्तिः ।।
21. द्र. अक्रान्तोष्मप्रत्ययभावमेके । ऋग्वेदप्रातिशाख्यम्, 6.52 अत्र उवटः 'अक्रान्तः (अद्विरुक्तः) ऊष्मा प्रत्ययो यस्याः स्वरभक्तेस्तस्या भावमेके आचार्या मन्यन्ते । वर्षम्। कर्हि। अदर्शि। जल्हवः। अक्रान्त इति कस्मात् ? वर्ष्यान्। अदर्श्यायती ।

शोधपत्रमिदं थाईलैंडदेशे बैंकाकनगरे सिल्पाकोर्न विश्वविद्यालये 28.06.2015-2.7.2015 दिनांकेषु समायोजिते षोडशे विश्वसंस्कृत-सम्मेलने प्रस्तुतमासीत् ।

## दैवज्ञं कं पृच्छेयम् !!



-मिश्रोऽभिराजराजेन्द्रः
सनराइज विलाटीयर्स कालोनी
लोअर समर हिल, शिमला- १७१००५ (हि.प्र.)

आयुरहो मे कियदवशिष्ट दैवजं कं पृच्छेयम् ।
सम्प्रत्यपि किं किं करणीयं दैवज्ञ कं पृच्छेयम् ??
मयि जीवति गाङ्गेयसदृक्षे सुयोधनादीनां नाशः
भविता वा न वा समरभूमौ दैवजं कं पृच्छेयम् ??
अधिरथसूनोरिव ममापि सूर्यात्मजता मरणात्पूर्वम्
पृथया प्रकाशयिष्यते नो वा दैवज्ञं कं पृच्छेयम् ??
प्रतिशाखं सुस्थिरा उलूका अस्मिन्मञ्जुलकेलिवने१
समुत्सारयिष्यन्ते नो वा दैवज्ञं कं पृच्छेयम् ??
पामरवसतेः सुखोन्मूलिनी दृष्टिर्द्रविणपिशाचानाम्
क्वचिदन्यत्र स्थास्यति नो वा दैवज्ञं कं पृच्छेयम् ??
हृदयोदधिमन्थनसमुत्थितं प्राणदाहि मे गरलमिदम्
धूर्जटिना पास्यते वा न वा दैवज्ञं कं पृच्छेयम् ??
जनितस्वापा क्लृप्तसाध्वसाऽपहृतमिथः परिचयसूत्रा
विपत्तमिस्रा क्षीयते न वा दैवज्ञं कं पृच्छेयम् ??
कामं श्वेताम्बरस्संसदि व्यवहारे नग्नो नेता
प्राप्स्यति मुक्तिं मृतो वा न वा दैवज्ञं कं पृच्छेयम् !!
राष्ट्रमिदं प्रच्छन्नसपत्नैर्बान्धिव्याभिनयोत्तीर्णैः !
मुक्तं हन्त भवेद्वा न वा दैवज्ञं कं पृच्छेयम् !!

१. प्रशस्ते भारतराष्ट्रे इत्यर्थः ।

## ईश्वरमुखेन विश्वार्थम् ऐक्यसन्देशः

-डॉ. वासुदेव वि. पाठकः 'वागर्थः'
374, सरस्वती नगर, आंबावाड़ी, अहमदाबाद-15

सत्यं यत्परमं सदात्मनिरतैः भद्रं यहोवात्मकम्
अर्हन्-बुद्धमयं शिवं मुनिवरैः नित्यम् अहुर्मज्द वा ।
सत्नामेति च राध्यते सुमनसा अल्ला च ताओ च तत्
विश्वैक्यं विदधाति सर्वमजनुजाः जीवन्तु वैरं विना ।।१।।

अहिंसा धर्मस्य प्रथम-परमा येन गणिता
जनानां कल्याणं नियतमनसा येन भणितम् ।
स एवाहं अर्हन् प्रमुदिततया वन्दितवरः
महावीरो वीरः सकलगुणदोषादिरहितः ।।२।।

सुखोपभोगेषु विरक्तभावम्
धृत्वा मुदा काङ्क्षितो मोक्षमार्गः।
दयैव भूतेषु क्षमापरत्वम्
बुद्धत्वभावेन मयोपदिष्टम् ।।३।।

दिव्ये लोके वसन्तं मां कल्पयन्तीह केचन
प्रीत्यात्मकं मदीयं ते दिशन्ति कार्यमन्वहम्।
ते चौवेशुसमाः पुत्राः ममैव कार्यसाधकाः
सेवन्ते मां परात्मानं सर्वजीवेष्ववस्थितम् ।।४।।

मजदारूपतश्चाद्यं मां सर्वतत्त्वमूलतः ।
आतशं मुख्यतो ध्यायन् ध्यायन्ति मूलतो हि माम् ।
सर्वदा पारसीकास्ते जरथुष्ट्रादिनोदिताः ।
ध्यायन्त्येकेश्वरं पुण्यं शुभं कुर्वन्ति यद्धितम् ।।५।।

रबः रहीमश्चाल्लाहं रहमानादिनामभिः
तौकीदत्वेन पूज्योऽहम् इस्लामे भावपूर्वकम्।
संगे असवदश्चाहं प्रतीकत्वेन जानथ
तथा अलअमीनश्च पैगंबरो महंमदः ।।६।।

एकेश्वरस्य नामानि विविधानि विचारकैः
विचारितान्यथापेक्षां जनानां हितकाम्यया ।।७अ।।

अर्हन्- बुद्धेशनामानि यहोवा रहिमश्शिवः ।
रामः कृष्णः अहुर्मन्दः एकत्वं नामभेदतः ।।७ब।।

माता धाता पिता भ्राता सर्वं तस्यैव रूपतः ।
अमृतस्यैकदेवस्य बालाः प्रीत्या सुखं शिवम् ।।७स।।

संसारे विलसत्येव पितुरेकस्य संततिः
साम्मनस्येन भ्रातघ्णां निर्व्याजा धर्मधारणा ।।८।।

आधारत्वेन धर्माणां स्मर्तव्यः परमेश्वरः ।
विस्मर्तव्यं तु वैरित्वं, भ्रातृभावेन जीवनम्।।९।

# पुनः कदाचित्

-गोपबन्धुमिश्रः

दूरभाषध्वनिः। पुंत्रस्य अनिकेतस्य स्यात् दूरभाषः। अद्य ततः प्रस्थाय श्वः अत्र प्राप्स्यतीति सूचना स्यात। सुशीला दूरभाषम् उदनाययत।

'हरिः ओम्, वत्स!' सुशीला सोत्कण्ठम् अवदत् । 'भवत्याः दूरभाषः सम्यक् अस्ति? दूरभाषविभागतः वदामि।' अपरस्मात् प्रदेशात् ध्वनिः आगतः ।

'सम्यग् अस्ति, महोदय ! धन्यवादः।' सुशीला दूरभाषम् अवानाययत्।

अद्यापि दूरभाषा नागता अनिकेतात। वारद्वयं प्रत्यहम् इव अद्यापि सुशीलया दूरभाषा कृता, ध्वनिः तु गतः। न उन्नायितवान् अनिकेतः। कार्ये संलग्नः स्यात्। आवासगृहं परिवर्तनीयम् इत्यतः वस्तूनां पुटीकरणं नयनम् इत्यादि कर्म करणीयम। भवत्याः अस्मिन् अवसरे यत्नं विधातुं किञ्चित् असौविध्यं भवितुम् अर्हति। अतः केवलम् एकसप्ताहं यावत् अस्मिन् वृद्धाश्रमे वसतु। ततः स्वयम् अहम् आगत्य भवतीम् इतः नेष्यामि। इत्युक्त्वा अनिकेतः इतः गतः। सप्ताहः अतीतः। पञ्चदश दिनानि जातानि । नायातः सः । दूरभाषायां कृतायां सामान्यतः व्यस्तध्वनिः आगच्छति। कदाचित् उन्नाययत्यपि अनिकेतः, वदति- इदानीं कार्ये व्यग्रः अस्मि, अहं शीघ्रम् एव आगच्छामि। किञ्चित् धैर्यं धरतु मातः! इत्येवम् उक्त्वा उत्तरम् अप्रतीक्ष्य दूरभाषाम् अवनाययति ।

'सुशीलावर्ये! आशां त्यजतु। वृद्धाश्रमम् इमं स्वगृहम् इति निश्चिनोतु।' समानवयाः अशोकधरः स्मितं हसित्वा अवदत्।

'नहि, नहि ! न मे पुत्रः तथा। सः अवश्यम् आगमिष्यति। मां नेष्यति इतः । अहं न स्थास्यामि अत्र।'

'सर्वेऽपि अत्र आगमनकाले एवं वदन्ति। किन्तु तान् इतः पुनः नेतुं कोऽपि न आगच्छति। हां, प्रबन्धस्य कृते धनं वृद्धाश्रमं प्रति अवश्यं प्रेषयन्ति समयेन।'

'नहि, एषा भवतः कथा स्यात्। न मम। भवान् मह्यम् ईर्ष्यति। अतः एवं बदति।' सुशीलायाः मुखे सम्भावनायाः किरणाः विकीर्णाः ।

'सुशीलावये! अहं तु कामये एव भवत्याः पुत्र आगच्छेद् इति। किन्तु एषा आशा...। एषा आशा प्रतीक्षां जनयति। प्रतीक्षा पीडां जनयति । पीडया अनास्था, अनास्थया अशान्तिः। किं च अशान्तस्य कुतः सुखम्?' अहसत् अशोकधरः।

मौनम् आचरत् सुशीला।

आत्मनि प्रत्ययो न भवति सुशीलायाः संसारे एवं भवतीति श्रुतम् आसीत, किन्तु अनिकेतोऽपि तथा भविष्यतीति अवधारणा एव नासीत् तस्याः। नहि नहि..... अपरं किमपि कारणं स्यात। अनिकेतः एवम् एव माम् अत्र परित्यक्तुं न शक्नोति। पुनरपि सुशीला आश्रमस्य दूरभाषातः दूरभाषम् अकरोत् । दीर्घकालं यावत् ध्वनिः गच्छति स्म अपरं पार्श्वम् अन्ततः अनिकेतः उदनाययत् दूरभाषम्।

किं वत्स! बहु व्यस्तः असि किं कर्मणि अविलम्ब सुशीला अवदत्।

'तत्तु अस्मि मातः ! इदानीम् अपि गृहपरिवर्तनकारणेन असीविध्यस्य परिसमाप्तिः नैव जातास्ति । एवं करोतु मातः । इतोऽपि कतिपयदिनानि तत्र तिष्ठतु। अहम् आश्रमस्य प्रबन्धकेन सह वार्तालापं करोमि। किमपि असौविध्यं येन न स्यात्। धनं तु प्रत्येकं मासे प्रेषयाम्येव।श एकेन श्वासेन अनिकेतः सर्वम् एतत् अवदत् ।

'किन्तु पुत्र!' किमपि वक्तुकामा आसीत् सुशीला।

'मातः! अनन्तरं पुनः कदाचित्। इदानीं मम अतीव व्यस्तता वर्तते। अहं पुनः आश्रमेण सह अद्यैव वार्तालापं विधास्यामि। अस्तु ।' दूरभाषम् अवानाययत् अनिकेतः अपरस्मिन् पक्षे।

'अनन्तरं पुनः कदाचित। पुनः कदा आत्मानम् आत्मनैव पृच्छन्ती आसीत् सा । स्मरन्त्यपि आसीत् तद्दिनं यदा त्रयोदशवर्षदेशीयम् अनिकेतं तस्याः निकटे विहाय अनिकेतस्य पिता दिवं गतः। प्रवेशिकायाः नवमकक्षायां पठन् आसीत् अनिकेतः। विद्यालयस्य उत्तमः मेधावी छात्रः आसीत्। अतः सर्वस्मिन् शून्यतां गतेऽपि सुशीला तस्य उत्तरोत्तरम् अध्ययनमेव अचिन्तयत। प्रवेशिकायाः अनन्तरम् अनिकेतः नगरे गत्वा महाविद्यालये पठेत् इति धिया तेन सह ग्रामस्य गृहम् अत्यजत् सा। ग्रामस्य कृषिभूमेः क्रमशः विक्रयणं कृत्वा कृत्वा नगरे भाटकगृहे अनिकेतं नीत्वा अवसत् सा अनिकेतस्य अध्ययने बाधा न स्यात्- इत्येकम् एव लक्ष्य मनसि निधाय सा पृष्ठ पुनः एकवारम् अपि नैव अपश्यत्। कदापि पुनः कदाचित् इति किं चिन्तितवती सा? नैव दिनानि, मासान् वर्षाणि कथम् अतीतानि नैव परिगणितं तया। जीवनस्य लक्ष्य किं, स्वजन्मनः सार्थकता क्व, स्वस्य व्यसनं च किम् इति किम् अपि कदापि विचारितं तया? केवलम् अनिकेतस्य मुखं दृष्ट्वा पत्युः अवर्तमानता, ग्रामजनपदात्मीयस्वजनानां दूरता स्वस्य आयुषः क्रमशः क्षीणता न कदापि ईक्षिता तया। अनिकेतस्य जागरणेन अथवा ततः प्राक् जागरणं, तस्य स्वप्नेन तदनन्तरं वा विश्रान्तिः तस्याः। प्रतिपलं शीतोष्णसुखदुःखेभ्यः अनिकेतस्य रक्षणम् एव ध्येयम्।

स्वस्य पित्रोः ज्येष्ठा कन्या आसीत् सुशीला अतीव स्निग्धा एकदा तयोः हबन्धनं त्यक्तम् अपरस्य कस्यचित् गृहशोभायै। क्रूरेण कालेन तद् अपि गृह छिन्नम् एतस्य बालकस्य वृद्धये समृद्धये।

अनिकेतः प्रगतशिक्षाम् अवाप्नोत्। उत्तमवेतनसहितम् उद्योगम् अपि। तस्मिन् दिवसे सुशीला आत्मानम् अबोधयत् मम उत्तरदायित्वं परमेश्वरेण पूर्णतां नीतम। लघुभाटकगृहं विहाय बृहत्कायं गृहं स्वीकृतम् अनिकेतेन। सुशीला आधुनिक व्यसनं किम् इति नैव जानाति स्म अथवा तद् विज्ञातुं तया अवसरः एव कुत्र प्राप्तः? यथा लघुभाटकगृहे तथा बृहद्भाटकगृहे गृहाद् गृहान्तरं, मार्गात् मार्गान्तरं तस्याः जीवनस्य अन्तरङ्ग एव विषयः आसीत्।

स्वेच्छया स्वानुरूपा सोद्योगां तरुणी सोमा पर्यणयत् अनिकेतः। उभयोः उद्योगगता व्यस्तता प्रतिदिनम् कार्यम् एव कार्यम् अनिकेतस्य आगमने विलम्बः, सोमायाः अपि । कीदृशः कार्यविधिरेषः? न अहः, न च रात्रिः, सर्वदा कार्यम्। यान्त्रिकं सर्वम्। तथापि एषा रीतिः आधुनिकी ।

स्वस्य गृहं भवेत्- सोमायाः विचारः। उत्तमः एव। सुशीला अचिन्तयत्- पुनः स्वस्य गृहम्' इति। अनुभवः जीवने समायास्वति । भवतु नाम पत्युः गृहं तु गतम्। पुत्रस्य गृहं तु स्वस्थ एव खलु।

श्रुतं मुख्यनगरे समधिकं मूल्यं दत्त्वा तदर्थं किञ्चन ऋणम् अपि स्वीकृत्य अनिकेतेन गृहं क्रीतम्। तद् गृहं सुशीलया दृष्टं न वस्तूनां स्थानान्तरणं भवति म। तदानीम् एव अनिकेतः अत्र एकस्य सप्ताहस्य कृते केवलम् इति उक्तत्वा सा प्रापिता। इदानीं पञ्चचत्वारिंशत् दिनानि गतानि। एकवारमपि अवसरं नैव प्राप्तवान् अनिकेतः अत्र आगन्तुम। मातरं द्रष्टुम्। इदानीं वदति पुनः कदाचित्...।

अशोकधरः प्रकोष्ठस्य दीपम् अज्वालयत् सायङ्कालः अभवत् सुशीलावर्ये! अन्धकारः आगतः। अन्धकारे उपविश्य किं चिन्तयति भवती' हसन् आसीत् अशोकधरः।

'सत्यं वदति भवान्। सायंकालः आगतः । किन्तु इदानीम् अवगच्छामि- पित्रालयत्यागकाले मम तु प्रातः काले एव सायङ्कालः आगतः आसीत्। तदानी भ्रान्तिः आसीत् मम-सः कालः दिवाकालः इति । इदानीं सत्यमेव अन्धकारः पुरतः आगतः इति । तां भ्रान्तिम् अद्यैव अवगच्छामि।' अवदत् सुशीला।

'नहि भोः सुशीलावर्ये स्वकीयं जीवनं वयं न जीवामः । केवलं परकीयं जीवनं समुद्धर्तुं यतामहे। किं वयं स्वश्वसनैः जीवितुम् असमर्थाः? किम् आशाप्रतीक्षे विहाय स्वात्मना शान्तिं लब्धुम् अधिकारः नास्ति अस्माकम्?" शनैः अवदत् अशोकधरः ।

अहसत् सुशीला। अवदत्, "मम पुत्रः किम् उक्तवान् जानाति? 'पुनः कदाचित्' इति। तस्य कृते तु मया कदापि एकक्षणमपि न चिन्तितम् इदम् 'पुनः कदाचित्' इति। यत् अपेक्षितं यद् अनपेक्षितम् अपि तत् तदानीम् एव विहितम् । अद्य पुनः मम कृते श्पुनः कदाचित्..."

-"तत्र आदौ 'न' इति योजयतु सुशीलाभगिनि! 'न पुनः कदाचित्' इति। तदेव आश्वासनम्। तदैव शान्तिः।"

साभार

# मरणादेशः

**मूल-ओडिया-कथाकारः-अजयमहापात्रः**
**अनुसर्जकः- नारायणदाशः**

मुन्नारेड्डिः इति नाम। सर्वे आह्वयन्ति मुना भ्राता इति । सुनेवेडा-महाविद्यालये अनुतीर्णतायां विशिष्टं स्थानं प्राप्य अधुना प्रायः सप्तवर्षाणि राजत्वं चालयति सः, तस्मिन्नेव महाविद्यालये। महाविद्यालयस्य चतुष्पथे, जल्पनगोष्ठीषु वीथ्युपवीथिषु सर्वत्र तस्य स्थानम्। दुष्टच्छात्राणाम् एकं दलं नीत्वा कन्याः उद्दिश्य टिप्पणीकरणम् एव तस्य दैनन्दिनं कार्यम्। न केवलं मद्यालये उपाहारालये वा, अपि तु श्रेणीकक्षेऽपि मद्यपानं तस्य आधुनिकी शैली। महाविद्यालयच्छात्रेभ्य आरभ्य प्राचार्यपर्यन्तं तस्य रक्तनयने वीक्ष्य सर्वे तूष्णीं तिष्ठन्ति, यतो हि स कुख्यातस्य माओनेतुः शिवारेड्डेः पुत्रः । शिवारेड्डिः तु स्वल्पदिनेभ्यः पूर्वं धाराप्रवाह-विस्फोरणेन शताधिकजनान् मारितवान्। परन्तु प्रमाणाभावाद् इदानीं कारागाराद् बहिः स पुनः एकस्याः माओलीलायाः योजनां करोति।

शिवारेड्डिः हिंस्रः पशुरिव। मनुष्यरक्तेन होलिकापालनं तस्य इच्छा व्यापारश्च । अनेन व्यवसायेन स कोटिशः रूप्यकाणि अर्जयति। सः अनैतिकः अर्थ एव अनर्थीकरोति तस्य पुत्रं मुन्नारेड्डिम्। मनुष्याद् अमनुष्यो भूत्वा स सम्प्रति दुष्टः आक्रमणकारी लम्पटः सम्पन्नः। सर्वाः कन्याः उपभोग्याः इति पण्यद्रव्याणीति वा चिन्तयति सः। तस्य इच्छा भवति चेद् उद्यानस्य सर्वाणि पुष्पाणि स चित्वा आघ्राय अवकरकण्डोले क्षेप्स्यति। सहसा एकस्य पुष्पस्य सौन्दर्यं सुवासश्च तस्य उन्मादं प्रेम्णा विपरिणतम्। तत् पुष्पम् अपि जानाति परितः भ्रमन्ति नैके भ्रमराः। सा कदापि कम् अपि भ्रमरं वक्रनेत्रेण अपि न पश्यति अपि च चिन्तयति भ्रमराः सर्वे उन्मादाः सन्ति इति। तस्य पुष्पस्य कस्माद् अपि भयं नास्ति भीतिर्नास्ति। कारणं सा आसीत् आरक्षाधीक्षकस्य अशोकचौधुरि-महोदयस्य कन्या प्रियाचौधुरी । सुन्दर्याः प्रियायाः सौन्दर्यस्य इन्द्रजालं यथा अन्यान् विमोहयति ततोऽधिकं विमोहयति तस्य ओडिशीनृत्यम्। महाविद्यालयस्य उत्सवे प्रथमवारं तस्या ओडिशीनृत्यं दृष्ट्वा विमोहितो जातो मुन्नारेड्डिः। तस्माद् दिनात् कन्याभ्यः टिप्पणीम् अत्यजत् सः। महाविद्यालये छात्रान् सावधानान् अकरोत् कोऽपि नेत्राणि स्फारीकृत्य तां द्रष्टुं नार्हति इति। तदर्थम् अनेकान् क्षतविक्षतान् रक्ताक्तान् च अकरोत्। तस्य मनसि हृदये च अधुना केवलं प्रिया। अधुना स शृणोति तथा अनुभवति तस्य हृदयस्य प्रतिस्पन्दनं प्रियायाः नुपूरशिञ्जिनीम् । एतत्तु सम्पूर्णतया एकपक्षीय प्रेम प्रेमिकः स उन्मादप्रेमी सम्पन्नः।

धारावाहिक-विस्फोरणस्य प्रमाणम् आरक्षिणां हस्ते लग्नम्। शिवारेड्डिः बन्दीकृतो कारागारं प्रेषितः। व्यवहारः प्रचलितः। माओ-महालये उत्तेजना दृष्टा। स्थाने स्थाने विस्फोरणानि, आरक्षकालयेषु विस्फोरणानि, आरक्षक संवाददातृसन्देहेन हननानि, आत्मसमर्पणं कृतवतां माओ-सदस्यानां परिवारजनानां हननानि, तर्जनानि, आदेशात्मकपत्राणि च वर्द्धितानि, तथापि शिवारेड्डिः न मुक्तः । सहसा तस्य सङ्केतेन आगते एकस्मिन् मृद्वर्णपिहितपत्रे दृष्टिः पतिता मुन्नारेड्गेः। स पत्रम् उद्घाट्य अपश्यत्। लिखितमासीत्-प्रथमम् अपहरणम् । शिवारे मुक्ते परं तस्मिन् कारागारात् प्रत्यागते मारणम्। शिवारेड्गः पुनः तस्य पिता। मानसिकस्तरे माओवादिभिः समतुल्यतां गच्छन् स पिहितपत्राद् भावचित्र निष्कास्य अपश्यत् । आश्चर्यभावेन वारं वारम् अपश्यत् भावचित्रम्। क्रमशः स व्यग्रोऽभवत्। सर्वत्र दूरवाणीम् अकरोत्। ज्ञातवान् यत् एषा आरक्षाधीक्षकस्य अशोक चौधुरि-महोदयस्य कन्या प्रियाचौधुरी । यस्तस्य पितरं वन्दीकृत्य व्यवहारं प्रचालयति। तदर्थं तस्य पितुर्मरणादेशोऽपि भवेत्। अपरपक्षे प्रियाचौधुरी अधुना माओवादिनां लक्ष्यम् । किं करणीयम्? किं न करणीयम् इति तथा न ज्ञातम्। सम्पूर्णरात्री तनेत्रयोर्निद्रा नास्ति, कं जीवविष्यति के मारविष्यति? इति।

परस्मिन् दिवसे प्रातः प्रियाचौधुरी अपहृता इति संवादः सम्पूर्ण ओडिशाराज्ये चर्चितविषयोऽभवत्। दूरदर्शनेषु प्रसारमाध्यमेषु संवादपत्रेषु सर्वत्र अयं प्रमुखसंवादः कोऽपि प्रियायाः संवादं न प्राप्तवान्। शिवारेः मोचनाय माओवादिनः संवादं प्रेषितवन्तः । रक्तवाहिन्याः प्रचारपत्राणि सर्वत्र प्रसारितानि । आरक्षाधीक्षकस्य अशोकचौधुरिमहोदयस्य परिवारे खेलति शोकस्य च्छाया। तथापि स सम्पूर्णतया नीरवः आसीत् साधारणजनतायाः प्रसारमाध्यमस्य च समक्षम्।

प्रिया आत्मानम् आविष्कृतवती चतुर्दिक्षु घनारण्यपरिपूरितायां पर्वतपरिवेष्टितायाम् एकस्यां समतलभूमी एकस्मिन् चन्द्रातपाञ्चिते शिविरे । शिबिराद् बहिरागत्य अपश्यत्, दूरे प्रवहते काचित् काकपेया नदी, नद्याः पार्श्वे एका सुन्दरी निर्झरिणी, सामान्यदूरे केचन हरिणा घास चरन्ति । नदीकूले नैके बका, गेण्डालिया पक्षिणच आहारान्वेषणे तत्पराः सन्ति । अतिचमत्कारः आसीत् प्रकृतेः मनोरमदृश्ये । परन्तु तन्मनोमध्ये स्थितं भयं जीवनस्य अनिश्चितत्वं च

तन्मनः हृदयश्च व्यचालयत्। पुनः परितः दृष्टिपातं कृत्वा हृदय विदार्य चीत्कृतवती । तस्याः चीत्कारः शान्तपरिवेशं शब्दायितं कृत्वा तत्पार्श्वे पुनः प्रत्यागच्छत्। न कोऽपि लाभो जातः । केवलं केचन पक्षिणः उड्डीनाः जाताः, हरिणाश्च सकृत् प्रियाम् अवलोक्य पुनः घासभक्षणे तल्लीना जाताः । प्रियाः पुनः परितः अवालोकयत्, अरण्यान्तराले अपरशिविरस्य अर्द्धभागो दृश्यमानो जातः । तत्र निश्चयेन तस्याः शत्रवो वसन्ति । तथापि अस्याम् अरण्यान्यां तु कश्चन मानवः अपेक्षते एव शत्रुः भवतु भवतु वा मित्रम्। एकनिःश्वासेन सा अधावत् दीर्घश्वासैः सह। दीर्घश्वासव्याकुला सा तस्य पटवेश्मनः समीपं प्राप्य द्विधां विना सङ्कोचं विना द्वारे लम्बितं वखम् अर्द्धम् उद्घाटय अन्तः मस्तकं प्रवेश्य अपश्यत् । तस्याः समक्षं स्थितं मनुष्यं विलोक्य तस्याः नयने क्रमशः विस्फारिते। सा तस्याः नयनयोरपि विश्वासं कर्तुं न शक्ता । अन्तः प्रविश्य सा तं मनुष्यं दृष्टवती, तस्याः आश्चर्यस्य सीमा पारं गता । सा तस्य पादयोः साष्टाङ्गं लम्बभावेन पतिता, लघुः शिशुरिव भो भो स्वरेण क्रन्दितवती। कथन धीरो नम्रः शान्तश्च कण्ठस्वरोऽश्रूयत वत्से, अत्र क्रन्दनस्य अर्थो मूल्यहीनः अस्माकं हस्ते स्वल्पः समयः। अनेन सीमितसमयेन बहुकिमपि करणीयम् अस्ति। न केवलं तव कर्णयोरपि तु मम कर्णयोरपि प्रतिक्षणम् ए.के. फर्टिसेभेन गर्जति। तब अपहरणं तथा मम अपहरणं जातम्। परन्तु व्यवधान तु एतावन्मात्रं यत्तव अपहरणं माओवादिशिवारेड्डिनिमित्तं मम अपहरणं तु तव कृते प्रियाचौधुरी विस्मिता सती पश्यन्ती स्थिता विश्वप्रसिद्धम् ओडिशिनृत्यगुरु केलुचरणमहापात्रम् गुरुः केलुचरणोऽवदत् संशयं दूरीकृत्य अकथयत्। अहं जानामि त्वं मम श्रेष्ठशिष्यायाः सुप्रियापाठक इत्यस्याः कन्या प्रियाचौधुरी। तब मातुः रूपगुणान् सम्मान्य तब पिता आइ.पि.एस. अशोकचौधुरी पर्यणयत्। परन्तु विवाहपरदिवसे एव बाल्यकालात् सुप्रियया तस्याः लघुलघुपादयोः बद्धं नुपूरं स उन्मोच्य अक्षिपत् । अज्ञापयत् यत् स कश्चन आरक्षाधिकारी, तस्य पत्नी नूपुरं बद्धा नर्तिष्यति चेत् तस्य अपमाननं भविष्यति। सुप्रियाया अन्तर्दाहम् अहम् अपश्यम् अनुभूतवान् तस्याः अन्तर्ज्वलनम्। तस्याः शिथिलेऽपि शरीरे मनः इदानीमपि स्वनैः सह नृत्यति तब अन्तः तस्याः कलाम् ईश्वर स्थापितवान् । त्वं तव पितुः अगोचरेण एकलव्य इव मम नृत्यानां दृश्यसान्द्रमुद्रिकां पश्यन्ती नृत्यम् अभ्यस्यसि। त्वया महाविद्यालयोत्सवे उक्तम् आसीत् खलु त्वम् ओडिशीनृत्ये जीवनादपि अधिकं स्निह्यसि, जीवने सकृद गुरोः केलुचरणमहापात्रस्य पादं स्प्रष्टुम् इच्छसि तथा मरणात् पूर्वम् एकवारम् अतिविशालमत्रे ओडिशाराज्यस्य उत्कृष्टकलारूपं नृत्यम् ओडिशीनृत्यं प्रदर्शयितुम् इच्छसि । वचनरहिता आसीत् प्रिया नेत्रयोः प्रवहते धारायाः परं धारा नेत्रजलस्य द्य सा विभाववयितुमपि न शक्नोति एतत् कीदृशम् अपहरणम् गुरुः केलुचरणोऽवदत्- मया तव मातुः मुखात् किञ्चित् श्रुतमासीत्, अवशिष्टम् एतेभ्यो माओवादिभ्यः श्रुतम् प्रिया नेत्रयोजलं प्रमार्जयन्ती आत्मानं नियन्त्रयति स्म केलुचरणः शिबिराद् बहिः प्रियाम् आनीय परितः स्थितान् पर्वतान् प्रदर्श्य अकथयत्- अत्र केवलं मस्तकोपरि आकाशः, पादतले पृथिवी, चतुर्दिक्षु दूराद् दूरतरं यावत् परिव्याप्ताः सन्ति वनपर्वतनदीनिर्झराः । अरण्य हिंस्रजन्तुभिः पूर्णम्, ततोऽधिकाः हिंस्राः सन्ति परितः स्थिताः शतसहस्रमाओवादिनः। श्वः सूर्योदयेन सह अस्माकं जीवनस्य अवशिष्टानां शतस्य दिनानां प्रथमदिनस्य आरम्भो भविष्यति। तेषां पणानुसारेण अहं मम जीवनस्य श्रेष्ठ-ओडिशिनृत्य शिक्षणं दास्यामि, त्वं तव जीवनस्य श्रेष्ठं नृत्यं प्रदर्शयिष्यसि । प्रतिदिनं नृत्यस्य अर्धहोरात्मिका दृश्यसान्द्रमुद्रिकां प्रस्तुत्य ते कस्मै एफ. टि. वि. दूरदर्शनवाहिन्यै दास्यन्ति । प्रतिदिनं साक्षात् दिवा द्वादशवादने प्रदर्शितं भविष्यति तत्। तन्मध्ये यदि शिवारेड्डिः मुक्तो न भविष्यति तदा शततमे प्रदर्शने सम्पूर्ण विश्व तव अन्तिमनृत्येन सह मृत्योः ताण्डवलीलाम् अपि द्रक्ष्यति। मम जीवनं मृत्युर्वा तेषाम् एव हस्ते । यतो हि मम अपहरणस्य संवादः कस्यापि पार्श्वे नास्ति। सर्वे जानन्ति अहं मम लण्डनस्थिते वासभवने अस्मि इति ।

प्रियाचौधुरी तस्या जीवनस्य सर्वान् स्वप्रान् प्राप्तवती हस्तलभ्यतया यथा मरणादेशं प्राप्य वलिस्तम्भे लम्बितुं गच्छन् अपराधी अन्तिमेच्छां पूरयति। सा तस्याः गुरोः केलुचरणस्य नेत्रे निमील्य पुनः प्रत्यक्षीकृतवती स्वीयं मृत्युम्। पुनः नेत्रे निमील्य पुनः उद्घाट्य आत्मानं द्रष्टुं चेष्टितवती, सा केवलम् एकां नृत्यरतां नायिका द्रष्टुं शक्तवती। तद्दिनात् सा प्रतिमुहूर्त्तम् अर्पितवती नृत्यनिमित्तम्। दिनात् परं दिनं नृत्यप्रस्तुतिभागाः वर्द्धिताः, तस्याः नृत्यशैल्यामपि परिवर्तनं जातम्, सा अभवत् अत्यन्तनृत्यनिपुणा । गुरुः केलुचरणोऽपि तस्याः नृत्यस्य प्रशंसकोऽभवत्। पचाशता नृत्यप्रस्तुतिभागैः एवं सम्पूर्णे उत्कले कोलाहलो जातः। प्रियाचौधुरीनृत्यस्य प्रशंसा सर्वेषां मुखात् श्रूयते स्म। यद्दिने नवनवतितमो नृत्यप्रस्तुतिभागः प्रस्तुतः, तदा कश्चन मुखावरणधरो माओवादी स्कन्धे

भूशुण्डिं निधाय तस्यां सान्द्रमुद्रिकायाम् अवदत्- श्वः भवति नर्तक्याः प्रियायाः अन्तिमदिवसः । ओडिशिनृत्यान्ते गुलिकाभिः तस्याः हननस्य दृश्यच्चित्रं भवन्तः द्रष्टुं शक्नुवन्ति । साक्षात् दिवा द्वादशवादने अन्तिमं नृत्यप्रस्तुतिभागम्।

न केवलम् ओडिशायां न वा भारतदेशे अपि तु भारताद् बहिरपि तदा प्रिया ओडिशीनृत्यशिल्पिरूपेण परिचिता आसीत्। ओडिशायाः पुरपल्लीषु ग्रामगञ्जेषु सर्वत्र सिक्थवर्तिकाशोभायात्रा अभवत्। सर्वे माओवादिभ्यः प्रियायाः जीवनम् अयाचन्त । पश्यत्सु एव सर्वेषु भारते विभिन्नस्थानेषु सिक्थवर्तिकाशोभायात्रा आयोजिता । समस्तदूरदर्शनवाहिनीषु प्रचलिताः तर्कवितर्काः आलोचनासभाश्च। सर्वे प्रियायाः मुक्तिम् इच्छन्ति स्म। सर्वकारस्य उपरि प्रणोदनम् आगतं, शिवारेढेः मोचनाय । किन्तु अशोकचौधुरी कठोरभावेन निराकृतवान्। तस्य पार्श्वे आसीत् मुन्नारेड्गेः पत्रम्। स नावगच्छति स्म, का इच्छा माओवादिनाम् इति । किं पुनः इच्छति अयं मुन्नारेड्डिः?

समयः सरति, निकटीभवति प्रायोजितः कार्यक्रम इव साक्षात्समचे सान्द्रमुद्रिका आगता साक्षात् दिवा द्वादशवादने आरब्धं प्रियायाः ओडिशिनृत्यम् । प्रथमतः सा विश्वप्रसिद्धस्य ओडिशिनृत्यगुरोः केलुचरण महापात्रस्य समक्षम् उपविश्य पूजार्चनम् अकरोत्। साक्षात् स्वयं गुरु केलुचरणं दृष्ट्वा सर्वे आश्चर्यान्विताः । प्रिया अपि जानाति एतत् तस्या जीवनस्य अन्तिमदिनम् । सा सर्वेभ्यो विनम्रप्रणतिपुरस्सरं नृत्यं न्यवेदयत्। तस्मिन् मुहूर्ते ओडिशायाः आबालवृद्धवनितानेत्राणि अश्रुपूरितानि जातानि सर्वे केवलम् ईश्वरं प्रार्थयन्ति स्म हे ईश्वर, त्वमेव सहायो भव। निरीहायाः प्रियाचौधुर्याः कृते जीवन देहि प्रिया तज्जीवनस्य श्रेष्ठाम् ओडिशी कला प्रदर्शयति स्म। एकदा पन्या सुप्रियापाठकवर्यायाः पादयोः नुपूरम् उन्मोच्य लघुलघुखण्डैः विभज्य क्षिप्तवान् अशोकचौधुरी अय पश्यन् अस्ति स्वकन्यायाः पदयोः नुपूरम्... वारं वारम् एकशतवारम्। तेन अवगतम् आसीत् नुपुरस्य महत्त्वम्। तेन ज्ञातमेव, कोऽपि इच्छति चेदवश्यं यन्त्रज्ञः, चिकित्सकः, भारतीयप्रशासनिकाधिकारी, नेता, मन्त्री, प्रधानमन्त्री वा भवितुं शक्नोति, न तु शिल्पी । यतो हि कला ईश्वरप्रदत्ता वर्तते । अधुना स विकलभावेन ईश्वरं प्रार्थयति- हे ईश्वर, मम जीवनविनिमयेन वा मम प्रियां मह्यं प्रत्यावर्तय।

साक्षात् सार्द्धद्वादशवादने प्रियाचौधुरी नृत्यं समापितवती । ततः परं झिलिझिलि भूत्वा दूरदर्शनानां जवनिकाः कृष्णवर्णीयाः अदृश्यन्त। ततः अश्रूयत भयङ्करभावेन विस्फोटनशब्दः। तदनु अगर्जन् भुशुण्डयः । सर्वे स्वल्पकालं यावत् निस्तब्धं स्थिताः। सर्वेषां मुखात् केवलम् अहो अहो, अये अये, चु... चु... शब्दाः निर्गताः । सर्वत्र शोकस्य च्छाया अखेलत्।

दिवसो निपतति। सूर्यः पश्चिमाकाशे निमज्जितः। सायं षड्वादनं स्यात् तदा दूरदर्शनजवनिकाशीर्षके आगतो मुनारेड्डेः आत्मसमर्पण-संवादः। संवादानुसारेण स राजसाक्षी भविष्यति। ततः संवादः सम्प्राप्तः प्रियाचौधुरी गुरुः केलुचरणश्च सुरक्षितौ आस्ताम्। तदानीं प्रियायाः नैके प्रशंसकाः आसन्। सर्वत्र स्फोटकानि स्फोटितानि, प्रसरति आनन्दलहरी।

माओवादिभिः ज्ञातं- प्रियाप्रेम्णाबद्धो मुनारेड्डिः विश्वासघातम् अकरोत्। तस्य पितुर्जीवनेनापि अखेलत्। ते आदौ तस्य सप्तसहयोगिनो निर्ममतया अघ्नन्। ततः तेषां लक्ष्ये स्थितो मुनारेड्डिः।

प्रियाचौधुरी तथा गुरुकेलुचरण इत्यनयोः साक्षात्काराः प्रसारिताः । प्रिया अवोचत्- मुनारेड्डिः क इति अहं न जानामि। न कदापि अपश्यम्। महाविद्यालये नाम श्रुतम् आसीत्, सहचरीभिरुक्तम् आसीत् स कश्चन दुष्टजनः। गुण्डाजनः । गुरुदेवोऽवदत्- मम अरण्यवासकाले कश्चन युवको मुखावरणं धृत्वा साक्षात् सन्ध्यायाम् अवनतायाम् आगत्य मम शिबिरं परितः दौवारिक इव तिष्ठति स्म, यथा कोऽपि मूषकः तैलपो वा मम अस्थायिगृहं न प्रविशेत्। पुनः प्रभातायां रात्रौ सिन्दूरिते आकाशे स क्व निर्गच्छति स्म कदापि कोऽपि नापश्यत् तम्। गुरुदेवः कथनम् अनुवृत्य अवदत्, आम्, तस्य नाम्ना स्थितां समग्रां सम्पत्तिं विक्रीय स ओडिशिनृत्यस्य प्रसारनिमित्तं कोटिद्वयपरिमितं धनं मम वित्तकोषसङ्ख्यायां सञ्चितवान्- गुरुदक्षिणारूपेण । सत्यं किमेवं भवेत् प्रेम इत्यहं मम जीवने प्रथमवारं जानामि ।

तद्दिने मुनारेडिः विचारलयगमनमार्गे माओवादिभिः विहितेन विस्फोरणेन नैके आरक्षका मृताः, अनेके च आहताः सन्ति। मुनारेड्डिः अपि तेन विस्फोरणेन रक्ताक्तो जातः, परन्तु विचारालयं यावद् गन्तुं समर्थो जातः। सर्वे प्रतीक्षां कृतवन्तः राजसाक्षिणो मुनारेड्डिः इत्यस्य कथनम्। स द्वन्द्वे आसीत्। एकतः आसीत् प्रिया, अधुना स जानाति एव प्रियायाः हृदये मुनारेड्डिः वसतिं चक्रे इति परन्तु स स्वयं न इच्छति प्रियायाः नाम्ना सह कस्यापि दुष्टजनस्य नाम योजितं भवतु इति । अपरतः स्वीयो जन्मदाता पिता-स दुष्टो भवतु, अशिष्टो वा भवतु, गुण्डा भवतु वा वदमास्। सर्वान् चमत्कृत्य स स्वविवृतौ अवदत्- अहं मुनारेड्डिः। अहं धारावाहिक-विस्फोरणेन शतसहस्रजनान् मारितवान्। समस्त-माओ-कार्यक्रमाणां मुख्यनायकः अहम् एव। व्यवहारः प्रचलितः, शिवारेड्डिः निर्दोष इति बन्धनमुक्तो जातः, मुनारेड्डिः मरणादेशं प्राप्तवान्। प्रियाचौधुरी अनुरोधं कृतवती, परन्तु मुनारेड्डिः तया साक्षात्कारं न कृतवान्। जीवने एकवारमपि प्रिया मुन्ना-मुखं न अपश्यत् । मातुः सुप्रियापाठकवर्याया इव तस्या अपि नुपूरं खण्डं खण्डं भविष्यति इति भयेन विवाहं न कृतवती। अधुना षष्ट्युत्तरवयःक्रमे अपि तस्याः नुपूरशिञ्जितं श्रूयते, सम्पूर्ण विश्वं शृणोति कथयति च- एवमेव भविष्यति प्रेम....।

साभार-कथासरित्

# संस्कृतसंस्कृतिविकाससंस्थानस्य आन्ध्रप्रदेशप्रान्तेन तिरुपतौ श्रीमती अंजुलासिंहमाहौर महोदयाः सम्मानिताः

संस्कृतसंस्कृतिविकाससंस्थानस्य आन्ध्रप्रदेशप्रान्तपक्षतः तिरुपतौ २३.०६.२०२३ दिनाङ्के आदरणीयानां श्रीमती अंजुला सिंह माहौर महोदयानां (विधायक-हाथरस-सदर-आसन- उत्तरप्रदेशः) सम्मानम् अभिनन्दनञ्च विहितम् । सर्वादौ आश्वासनं दत्तम् एवं स्वोद्बोधने सर्वेभ्यः धन्यवादः ज्ञापितः। संस्कृतसंस्कृतिविकाससंस्थानस्य राष्ट्रियाध्यक्षेण प्रो.राधागोविन्दत्रिपाठिमहोदयेन आन्ध्रप्रदेशप्रान्तस्य सर्वेषां सदस्यानां परिचयः कारितः। अवसरेऽस्मिन् संस्कृतसंस्कृतिविकाससंस्थानस्य सदस्याः




संस्कृतसंस्कृतिविकाससंस्थानस्य आन्ध्रप्रदेशप्रान्ताध्यक्षेण प्रो.एस. दक्षिणामूर्त्तिमहोदयेन पुष्पगुच्छं प्रदाय महोदयानां स्वागतं कृतम् । श्रीमती अंजुला सिंहमाहौर सिंहमहोदयाः भगवतः वेङ्कटेश्वरस्य दर्शनार्थं परिवारेण सह तिरुपतिं समागताः। सन्दर्भे अस्मिन् श्रीमती अंजुला सिंह माहौर महोदयाः राङ्कव-प्रतीकादिद्वारा सम्मानिताः। अस्मिन् अवसरे श्रीमती अंजुला सिंह माहौर महोदयाः सर्वेषां सदस्यानां मार्गदर्शनं कृत्वा संस्कृतस्य संस्कृतेश्च प्रचारार्थम् अधिकसक्रियरूपेण कार्यं कर्तुं प्रेरितवत्यः। श्रीमती अंजुला सिंह माहौर महोदयाभिः संस्थानस्य कृते प्रशासनपक्षतः अपेक्षितसाहाय्यस्य डॉ. सच्चिदानन्दमूर्तिमहोदयः, डॉ.परमिता पण्डामहाभागा, डॉ. लीनाचन्द्रामहाभागा, डॉ.लक्ष्मणकुमारमहोदयः, डॉ. एस. वैष्णवीमहोदया, डॉ. चारुकेशमहोदयः, डॉ. अश्वनीकुमारमहोदयः, डॉ. वी. धर्मदासनमहोदयः डॉ. नारायणमहोदयः, श्रीबालकरामसारस्वतमहोदयः, श्रीराहुलकुमारमहोदयः, श्रीकेशवमहोदयः एवं डॉ. कृष्णकुमारभार्गवमहोदयः च उपस्थिता आसन्। संस्कृतसंस्कृतिविकाससंस्थानपक्षतः डॉ. कृष्णकुमारभार्गवमहोदयेन धन्यवादः ज्ञापितः।

जयतु संस्कृतम् जयतु भारतम् जयतुभारतीया संस्कृतिः।

प्रथमपुटस्य शेषभागः

## नवमे अंताराष्ट्रिययोगदिवसे....

निश्चयेन भारतस्य न अपितु पूर्णविश्वस्य केन्द्रम्। है उत्तराखण्डः योगः, अध्यात्मं, संस्कृतिश्च इत्येषां क्षेत्राणां विकासं करिष्यति प्रयास करेंगे। कार्यक्रमे योगनवाचारान्तर्गतं स्वामी प्रार्थना, ग्रीवा चालन, स्कंध संचालनं, कटि संचालनं,गुल्फ संचालनं,ताड़ासनं, वृक्षासनं, पादहस्तासनं, अर्ध-चक्रासनं, त्रिकोणासनं चेत्यादीनि विविधासनानि शांति पाठेन योगसत्रस्य समाप्तिः अभूत् ।

कार्यक्रमे पतंजलि गुरुकुलस्य क 66 बालयोगिनः 150 निमेषान् यावत् 2100 तः अधिकं सूर्य नमस्कारं कृतवन्तः । पतंजलि गुरुकुलस्य, आचार्यकुलस्य, पतंजलि विश्वविद्यालयस्य च छात्र-छात्राः योगेन संबद्धप्रतिभां प्रदर्शनं कृतवन्तः ।

स्वामी उपस्थितेभ्यः 20 सहस्राय साधकेभ्यः योगयुक्तं व्यसनमुक्तं च संकल्पं कारितवान् । विदेहदेवस्य पिता डॉ. विश्वम्भर बिशन दत्त जोशी 'शैलज' द्वारा रामायणस्य कुमाऊनीभाषया अनुवादेन आधारित ग्रन्थस्य विमोचनं स्वामिना आचार्येण प्रदेश मुख्यमंत्रिणा च विहितम्।

रूड़की, ऋषिकेश, हरिद्वार, देहरादून एत्येषां नगराणांशतशः सैकड़ों ग्रामेभ्यः नैके कार्यकर्तारः भागग्रहणम् अकुर्वन् ।अवसरेस्मिन् पतंजलि योग समितेः मुख्य महिला केन्द्रीय प्रभारी एवं पतंजलि विश्वविद्यालयस्य कुलानुशासिका एवं संकायाध्यक्षा- मानविकी एवं प्राच्य विद्या संकाय साध्वी देवप्रिया , आचार्यकुलस्य निदेशिका भगिनी ऋतम्भरा शास्त्री, पतंजलि फूड्स लि. के एम.डी. श्री रामभरतः, क्रय समिति अध्यक्षा भगिनी अंशुल, संप्रेषण विभागाध्यक्षा बहन पारूलः, मुख्य केंद्रीय प्रभारीगण भाई राकेशः 'भारत' एवं स्वामी परमार्थ देवः, पतंजलि विश्वविद्यालयस्य प्रति-कुलपति डॉ. महावीरः , पतंजलि अनुसंधान संस्थानस्य प्रमुख वैज्ञानिकः डॉ. अनुराग वार्ष्णेयः, कुलसचिवः महोदया भगिनी प्रवीण पुनिया, कुलानुशासक स्वामी आर्षदेवः, सहायकः कुलसचिवः डॉ. निर्विकारः, साध्वी देवमयी, साध्वी देवश्रुतिः, साध्वी देववरण्या, स्वामी विदेहदेवः, स्वामी मित्रदेवः, स्वामी विनयदेवः, स्वामी ईशदेव, स्वामी सोमदेवः, स्वामी बजरंगदेवः इत्यादयः योग सत्रे भागं गृहीतवन्तः ।

# भगवानदीनआर्यकन्यामहाविद्यालये अंताराष्ट्रिय योगदिवसः सम्पन्नः

लखीमपुरखीरी। योगस्य कार्यक्रमः अयं भारतीय योग संस्थानस्य जिल्ला मंत्री योगाचार्य श्री शिवराम वर्मणः भारतीय योग संस्थानजिल्ला प्रमुखायाः श्रीमत्याः अर्चना श्रीवास्तववर्यायाः नेतृत्वे संपन्नः। मुख्य अतिथि श्रीमती अर्चना श्रीवास्तवः महिलाभ्यः योग विषये महत्वपूर्ण विचारेभ्यः छात्राः लाभान्विताः । तयोक्तं महिलानां द्विगुणितं दायित्वं भवति अतः तासां स्वस्थ्यं परमिवश्यकम् । योगाचार्यः श्री शिवराम वर्मा उक्तवान् यत् प्राकृतिक जीवनात् दूरे प्रदूषित वातावरण कारणेन अद्यतन मानवः विभिन्न रोगैः ग्रस्तः । अस्मिन् स्थितौ मानवेन स्वस्थयुक्ता प्राकृतिक जीवनशैली समाचर्या। कार्यक्रमस्य शुभारंभं मुख्यः अतिथिः एवं मंचासीन अधिकारिणः च दीप प्रज्वलनेन कृतवन्तः। तत्पश्चात् ओम ध्वनिं, गायत्री मंत्र भावार्थ सहितं डॉ.सुशीला देवी पाठमकरोत्। सूक्ष्म क्रियाः भारतीय योग संस्थानस्य क्षेत्रीय प्रमुखया श्रीमती सुमन वर्मणा संपादिताः। आसन श्रृंखलया योगाचार्यः श्री शिवराम वर्मा ताड़ासनं, अर्ध चक्रासनं,वृक्षासनं, वज्रासनं, शशक आसनं, भुजंगासनं, सेतु बंधः, पवन मुक्तासनं ,हास्य योगः,शवासनम् इत्यादीनाम् आसनानाम् अभ्यास करितवान् । पञ्चसु चरणेषु ध्यानं सुशीला देवी कारितवतीद्य अध्यक्षीये उद्बोधने डॉ. गीता शुक्ला: कथितवान् भारतीय परंपरायां महर्षि पतंजलेः योग सूत्रक्षेत्रे प्राचीन कालतः जीवनं स्वस्थं निर्मातव्यम् इत्यत्र महत्वपूर्णं योगदानम् आदधाति । कार्यक्रमस्य समापनं लोक कल्याण कारिप्रार्थनया,व शांति पाठेन जातमः। आभार प्रदर्शनं कार्यक्रमसंयोजनं, संचालनं डा सुशीला देवी अकरोत्। कार्यक्रमे महाविद्यालयस्य शिक्षिकाः डा.सुचना त्रिवेदी ,श्रीमती अर्चना सिंह ,व शिक्षणेत्तर कर्मचारिणः छात्राः उपस्थिताः ।




# श्रीजगन्नाथरथयात्रा भारतीयसंस्कृतेः, दर्शनस्य आस्थायाः चैतन्यप्रतीकः-प्रो वरखेडी

श्रीजगन्नाथ रथयात्राविषये केंद्रीय संस्कृत विश्वविद्यालय नई दिल्ली इत्यस्य कुलपतिः प्रो श्रीनिवास वरखेडी कथितवान् यत् प्रत्येकं वर्षे आषाढ़ मासीय शुक्ल द्वितीयायां भगवता जगन्नाथेन सह तदग्रजः बलरामः भगिनी देवी शुभद्रा इत्युभयोः रथयात्रा भारते न केवल पौराणिकं , सांस्कृतिकं दार्शनिकं लोक आस्थायाः चौतन्य प्रमाणम् अपितु अस्मिन् भारतीय ज्योतिषशास्त्रेण, पर्यावरण विज्ञानेन च सह पारिवारिक जीवने परस्परं सम्मानं, सामाजिक समरसता इत्यनयोर्भावो विद्यते। रथयात्रायाम् अस्याम् आयुश्श्रेष्ठता तन्महत्त्वं, संयुक्त परिवारं प्रति सम्मानभाव अद्यतन विखण्डित समाजाय शिक्षाप्रद मान्यते । कारणं तस्य रथ यात्रायां पूर्वं अग्रजः भगवान् बलरामः ,मध्ये भगिनी देवी शुभद्रा तृतीये स्थाने भगवतःजगन्नाथस्य रथ यात्रा अग्रे वर्धते। भगिनी तु समस्तसम्बन्धान् अक्षुण्णान् कर्तुम् उत्तरदायित्वं निर्वहति तत्संरक्षणं संबर्धनं चापि परितः अपेक्षितम् । संभवतः एतदेव कारणम् अस्यां रथ यात्रायां देवी सुभद्रा मध्ये विराजते।

श्रीक्षेत्रनाम्ना विख्याता तथा च श्री जगन्नाथ भगवतः लीलास्थली पुर्याः भौगोलिक्यां ,आध्यात्मिक्यां च दार्शनिकपरम्परायां वैष्णव धर्मस्य पौराणिक विश्वासः यत् भगवतः श्रीजगन्नाथस्य देवी राधायाः श्रीकृष्णेन सह संयुक्तः साकाररुपः वर्तते समग्र संसारस्य उद्भवोपि इतः एव जातः।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।